॥ संवत २४९ वर्षे वेशाष सुदि ३ श्री मुलसंघे भट्टारक जी श्री जिन चन्द्रदेव साह जीवराज पापडीवाल नित्य प्रणमति सर मम श्री राजाजी स संघे---

(324)

संवत १५४८ वर्षे वैसाष सुदि ३ मुलसंघे भट्टारक श्री जिन चन्द्र सा० जिवराज पापडिवाल सहैरम-सा श्री राजसी संघ रावल॥

(325)

॥ संवत १६०४ ज्येष्ठ वदि ३ सोमवारे क्रुरवंशे महाराजधिराजजी श्री मत स्याहजा राज्य भ०॥ चंद्रकीर्तिजी तत्पदे भ० श्री देवेन्द्र कीर्त्तिजी सदाम्नाये सरस्वती गच्छे वलात्कारगण कुंदाचार्यान्वये शुभं।

(326)

संवत १७३२ वर्षे मार्गशिर्ष वदि पंचमी गुरौ ढाकामध्ये---- काष्ठा संघ माथुर गच्छे पुष्कल गण लोहाचार्या न्वये दिगम्बर धर्म भट्टारक रूपचन्द्र प्रतिष्ठितं अग्रवाल गांगलु गोत्रे सा० गुलाल दास भा० मुलादे पुत्र०। सावलसिंघवी भमरसिंघवी केसर सिंह त्रि---प्रतिष्ठा कारापितानि सेरपुरेन्तिके ---- ढाकायां प्रतिष्ठा। --- पादुकानां॥ श्रेयोस्तुः॥ पादुका आदिनाथकी। गुरुपादुका॥

(327)

नेमनाथजीके विंवपर ।

॥ सं० १९१० माघ शु० १४ शनौ काष्ठासं (घ) माथुर गच्छ पुष्कर गण लोहाचार्य याम्नाय भ० देवेंद्र कीर्त्तिदेव तत्पट्टे भ० जगत् कीर्त्तिदेव तत्पदे भ० ललित कीर्त्तिदेव तत्पदे भ० राजेन्द्र कीर्त्तदेव हदाम्नाय अग्रोत् कान्वय वासिल गोत्रे सा० श्री सौपीलाल तत्पुत्र बाबु मुनिसुव्रत दासेन श्री जिनालय पूर्वक श्री जिन विंवं प्रतिष्ठा कारापिता आरामपुर वास्तव्य---- स्य रामसरा मध्ये श्रीरस्तु ॥ श्री ३ ॥

(328)

॥ श्री संवत १९१० शाके ॥ १७७५ साल मिती वैशाख शुक्ल पंचम्यां गुरौ पाटलीपुर सर जिनालय पूर्वक श्री श्री नेमनाथ मंदिरजी जेसवाल माणकचन्द तत्पुत्र मटरु मल तत्पुत्र सीवनलाल प्रतिष्ठा कारापितं श्रीरस्तु ।

(329)

श्री स्थूलभद्रजी का मंदिर ।

॥ संवत १८४८ वर्षे मार्गशिर वदि ५ सोमवासरे श्री पाडली वास्तव्य श्री सकल संघ समुदायेन श्री स्थूलभद्र स्वामीजी प्रसादस्य कारापितं कार्य्यं स्याग्रेस्वरी श्री तपा गच्छीय श्राद्धैः श्री लोढा श्री गुलावचन्दजी प्रतिष्ठि तं सकल सूरिभिः ।

(330)

चरण पर ।

सं० १८४८ ॥ भाद्र सुदि ११ श्री संघेन । श्रुत केवलि श्रीस्थूल भद्राचार्याणां देवगृहं कारयित्वा तत्र तेषां चरण न्यासः कारितः प्रतिष्ठितं श्री अमृतधर्मवाचनाचार्यैः ॥

सेठ सुदर्शनजी का मन्दिर ।

(331)

चरण पर ।

अध्ययपदाप्तस्य श्री श्रेष्ठि सुदर्शनस्य इमे पादुके संप्रतिष्ठिते सकल संघेन शुभ संवत्सरे ॥

दादा वाड़ी ।

(332)

संवत १६८२ मार्गशिर्ष शुदि ५ सा० कटार मल तस्यात्मज सा० कल्याण मल पुत्र चिंतामणि श्री जिन कुशल सूरि० भ । वेगमपुर वास्तव्य ।

(333)

संवत १६९९ वर्षे पूर्व देशे पाडलिपुर नगरे वेगमपुर --

(334

तपागच्छे भ० श्री ५ श्री हीर विजय सूरि जगत पादुकेभ्यो नमः पं० चंद्र कुशल गणि नित्यं प्रणमतिश्च । सं० १७६२ वर्षे कार्तिक शुक्ल ९ सा० वेणीदास पुत्र भीमसेन पुत्र मयाचन्द वीराणी गोत्रे प्रतिष्ठितं- वीराणी मयाचन्द प्र० क० पाडलीपुरे ।

(335)

साध्वीजी के चरण पर ।

सं० १८४४ वर्षे शाके १७०९ प्रवर्त्तमाने मिति माघ मासे शुक्ल पक्षे सूरीशाखायां साध्वी महत्तरा सुजान विजयाजी तत् शिष्यणी दीप विजयाजी तत् शिष्यणी अंते वासिनी पान विजया कारापितं वाराणसी मनसा रामेन प्रतिष्ठा कारापितं शुभमस्तु ॥

श्री समेत शिखर तीर्थ ।

यह प्रसिद्ध जैन तीर्थ पूर्व देश जिला हजारिबागमें है। १ । १२ । २३ । २४ यह ४ तीर्थंकरोंके सिवाय और २० तीर्थंकरोंका निर्वाण कल्याणक यहां हुवे हैं। यह पवित्र पहाड़के २० टोंकमेंसे १९ टोंक पर छत्रिमें चरण पादुका विराजमान हैं और श्री पार्श्वनाथ स्वामीके टोंक पर मंदिर है। तलहटी मधुबनमें मंदिर और धर्मशाला बने हुवे हैं। यहांसे ४ कोस पर ऋजुवालुका नदी बहती है जिसके समीपमें श्री वीर भगवानका केवल ज्ञान भया था। यहां पर चरण पादुका है। यहांका और मधुबनका लेख जैन तीर्थ गाइडसे लिया गया है।

ऋजुवालुका नदीके किनारे छत्रिमें

चरण पर ।

(336)

ऋजुवालुका नदी तटे श्यामाक कुटुम्बी क्षेत्रे वैशाख शुक्ल १० तृतीय प्रहरे केवल ज्ञान कल्याणिक समवसरणभूत् मुर्शिदाबाद वास्तव्य प्रतापसिंह तद्भार्या मेहताव कुवर तत्पुत्र लक्ष्मीपतसिंह बहादुर तत्कनिष्ट भ्राता धनपतसिंह वहादुरेण सं० १९३० वर्षे जीर्णोधारं कारापितं ।

मधुवनके मन्दिरके मूर्त्तियों पर ।

(337)

संवत् १८५४ माघ कृष्ण पंचम्यां चंद्रवासरे श्रीपार्श्व जिन विंवं प्रतिष्ठितं -- ।

(338)

संवत १८५५ फाल्गुण शुक्ल तृतीयायां रवौ श्रीपार्श्वनाथस्य शुभ स्वामी गणधर विंवं प्रतिष्ठितं जिन हर्ष सूरिभिः कारितं च वालुचर वास्तव्य श्रीसंघेन ।

(339)

संवत १८७७ – – श्रीपार्श्व विंवं प्रतिष्ठितं श्री जिन हर्ष सूरिणा कारितं – – सांवत सिंहज पदार्थ मल्लेन – – – ।

(340)

संवत् १८७७ वैशाख शुक्ल १५ श्रीपार्श्वबिवं प्रतिष्ठितं श्रीजिनहर्ष सूरिणा गोलेछा महतावो – – मूलचन्द्र धर्मचन्द्रेण कारितं ।

(341)

संवत १८८७ वर्षे फाल्गुन शुक्ल १३ श्रीपार्श्वनाथ जिन विंवं दुगड़ ज्येष्ठमल्ल भार्या फत्ती नाम्न्या वाचक चारित्रनंदि गणि उपदेशात् कारितं प्रतिष्ठितं च ।

(342)

संवत १८८८ माघ शुक्ल पंचम्यां सोमवासरे श्री शितलनाथ विंवं कारितं ओशवंश दुगड़ गोत्र प्रतापसिंहेन प्रतिष्ठितं च श्री जिन चंद्र सूरिभिः ।

(343)

संवत १८८८ माघ शुक्ल पंचम्यां चंद्रवासरे श्रीचंद्रप्रभ जिनविंवं कारितं ओशवंशे नवलखा गोत्रे मेटामल पुत्र जसरूपेन प्रतिष्ठितं च वृहद भट्टारक खरतर गच्छ श्री जिनाक्षयसूरी चंचरीक श्रीजिनचंद्र सूरिभिः ।

(344)

सं० १८९७ वर्षे – – –श्री ऋषभ जिनविंवं कारितं प्रतिष्ठितं – – –।

(345)

सागरांकवसुचंद्र वर्षे (१८९७) नेत्रपण गणधरायुते शके (१७६२) फाल्गुनां तिमदले सुनागके (५) भार्गवे खितपटौघपालके वाणारस्यां श्रीमद्भगवत्सहस्त्रफणालंकृत श्री पार्श्वनाथ जिनमूर्त्तिः कारापितं श्रे० उदय चन्द्र धर्म पत्नी महाकुवराख्यया मूल चंद्र सुत युतया बृहत्खरतर गणेश श्री जिन हर्ष गणि पदालंकृत श्री जिन महेंद्र सूरिणा प्रतिष्ठिता।

(346)

सं० १९०० वर्षे -- श्री गोडी पार्श्वनाथ विंवं का० --- ।

(347)

सं० १९१० शाके १७७५ माघ शुक्ल द्वितीयायां श्री पार्श्वविंवं प्रतिष्ठितं वृहत्खरतर गच्छे - -- ।

टोंकपरके चरणों पर ।

(348)

॥ संवत् १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय सा० खुसाल चन्देन श्री अजितनाथ पादुका कारापिता श्री मत्तपा गच्छे ।

(349)

॥ संवत् १९३१ । माघे । शु । १० चंद्रे । श्री अजितनाथ जिनेन्द्रस्य चरण पादुका जीर्णोद्धार रूपा श्री संघेन कारापिता । मलधार पूर्णिमा श्री मद्विजय गच्छे । भट्टारक । श्री जिन शांतिसागर सूरिभि प्रतिष्ठितं च ॥

(350)

॥ संवत् १८२५ वर्षे माघ सुदि ३ गुरौ बिरानी गोत्रीय सा० खुसालचंदेन श्री संभव पादुका कारापिता श्री मत्तपा गच्छे ॥

(351)

संवत् १९३० । माघे । । शु० १० । चंद्रे । श्री संभव जिनेंद्रस्य चरण पादुका श्री संघेन कारापितां । मलधार पूर्णिमा ॥ विजय गच्छे । श्री भट्टारकोत्तम श्री पूज्य श्री जिन शांति सागर सूरिभिः प्रतिष्ठितं ॥

(352)

॥ सं० १९३३ का जेष्ट शुक्ले द्वादश्यां शनिवासरे श्री अभिनन्दन जिनेंद्रस्य चरण पादुका जीर्णोद्धार रूपा श्री संघेन कारिता मलधार पूनमीया विजय गच्छे श्री जिन चंद्र सागर सूरि पट्टोदय प्रभाकर भट्टारक श्री जिन शांति सागर सूरिभिः प्रतिष्ठितां । स्थापितांच । शुभं श्रेयसे भवतु ।

(353)

॥ सं० । १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय सा० खुसाल चंद्रेण श्री सुमति नाथ पादुका कारापिता च । सर्व सूरिभिः श्री तपा गच्छे ।

(354)

॥ सं । १९३१ । माघे । शु । १० श्री सुमतिनाथ जिनेंद्रस्य चरण । पादुका । जीर्णोद्धार रूपा । गुर्ज्जर देसे श्री संघेन स्थापिता । कारापिता । विजय गच्छे । भ । श्री जिन शांति सागर सूरिभिः । प्रतिष्ठितं ॥

(355)

॥ सं १९४९ माघ सु० १० सुक्रवा । श्री समेत शैल पर्वते श्री पद्म प्रभु जिन चरण स्थापितं प्रति । भ । श्री विजय राज सूरि तपा गच्छे ।

(356)

॥ संवत् १८२५ मह सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंदेन श्री सुपार्श्व-पादुका कारापिता प्र० ।

(357)

संवत् १९३१ । माघे । शु । १० । सुपार्श्वनाथ जिनेंद्रस्य । चरण पादुका जीर्णोद्धार रूपा । सेठ उमा भाई हठी सिंहेन तया स्थापना कारापित पूर्णिमा विजय गच्छे । भट्टारक । श्री जिन शांति सुरिभि । प्रतिष्ठितं च ।

(358)

॥ संवत् १८४९ माघ मासे शुक्ल पक्षे पंचमी तिथौ बुद्धवारे । श्री चंद्र प्रभु जिनस्य चरण न्यासः श्री संघाग्रहेण । श्री वृहत् खरतर गच्छीय । जंगम । युग प्रधान भट्टारक । श्री जिन चंद्र सूरिभिः । प्रतिष्ठितः ॥ श्री ॥

(359)

॥ संवत् १९३१ वा वर्षे । माघ सुदि १० तिथौ श्री सुविधि जिनेंद्रस्य चरण पादुका । अहमदावाद वास्तव्य सेठ उमा भाई हठी सिंहेन कारापिता । मलधार पूर्णिमा विजय गच्छे । भट्टारक । श्री जिन शांति सागर सूरिभिः । प्रतिष्ठितं ॥

(360)

॥ संवत १९३१ । माघे । शु । १० तिथौ । चंद्रे । श्री सुवधि जिनेंद्रस्य चरण पादुका जीर्णोद्धार रूपा । अहमदावाद वास्तव्य । सेठ उमा भाई हठी सिंहेन स्थापिता कारापित च । मलधार पूर्णिमा । श्री मद्विजय गच्छे । श्री भट्टारकोत्तम । श्री श्री जिन शांति सागर सूरिभिः ॥ प्रतिष्ठितं । स्थापितं च शुभ श्रेय ।

(361)

॥ सं० । १८२५ वर्षे माघ सुदि ३ गुरे विरानी गोत्रीय सा० श्री खुसाल चंद्रेण । श्री श्रीतल जिन पादुका कारापिता श्री तपा गच्छे ॥

(362)

॥ संवत् १९३१ वर्षे माघे । शु । १० । चंद्रे श्री सीतल नाथ जिनेंद्रस्य चरण पादुका जीर्णोधार रूपा गुजराती श्री संघे कारापिता ॥ मलधार पूर्णिमा विजय गच्छे । भट्टारक । श्री जिन शांति सागर सूरिभिः । प्रतिष्ठितं । स्थापितं च ।

(363)

॥ संवत १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंदेन श्री श्रेयांस प्रभु पादुका कारापता प्रतिष्ठिता च श्रीमत्तपा गच्छे।

(364)

॥ संवत् १९३१ माघे शु । १० तिथौ । श्री श्रेयांस नाथ जिनेंद्रस्य चरण पादुका जीर्णोद्धार रूपा । गुजरातका श्री संघेन तया स्थापना कारापितं पूर्णिमा श्रीमद्विजय गच्छे । भ । श्री पूज्य । श्री जिन शांति सागर सूरिभिः । प्र ।

(365)

॥ संवत् १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसालचंदेन श्री विमल नाथ पादुका कारापिता प्रतिष्ठिता च श्रीमत्तपा गच्छे ॥ श्री ॥

(366)

॥ संवत् १९३१ माघ शुक्ले १० चंद्रो श्री विमलनाथ जिनेंद्रस्य पादुका चीर्णोद्धार रूपि। गुजरात का श्री संघेन । तया स्थापना कारापिता । मलधार श्री बिजय गच्छे । जं । यु प्र । भट्टारक । श्री पूज्य । श्री जिन शांति सागर सूरि प्रतिष्ठितं च ।

(367)

॥ संवत् १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंदेन श्री अनंत प्रभु पादुका कारापिता प्रतिष्ठिता च सर्व्व सूरिभिः श्रीमत्तपा गच्छे ॥ श्री रस्तुः ॥

(368)

॥ संवत् १९३१ वर्षे माघ शु० १० चंद्रे श्री अनंत नाथ जिनेन्द्रस्य चरण पादुका जीर्णोद्धार रूपा । श्री संघेन स्थापना कारापिता । मलधार पूर्णिमा श्री मद्विजय गच्छे भट्टारक । श्री शांति सागर सूरिभिः प्रतिष्ठितं । स्थापितं ।

(369)

॥ सं १९१२ वर्षे शाके १७७७ मिते मासोत्तम मासे मार्गशीर्ष कृष्ण पक्षी नवमी तिथौ सोमवासरे विजय योगे कुंभ लग्ने श्री सम्मेत शैले श्री धर्मनाथ चरण पादुका प्रतिष्ठिता वृहत् खरतर भट्टारकोत्तम भट्टारक श्री जिन हर्ष सूरीणां । पद प्रभाकर श्री जिन महेंद्र सूरिभिः स साधुभिः कारिताश्च वाराणसीस्य श्री संघेन कालिपुरस्य संघेनया ।

(370)

॥ संवत् १९३१ माघे । शु । १० तिथौ श्री धर्मनाथ जिनेंद्रस्य चरण पादुका जीर्णोद्धार रूपा । मम्बई वास्तव्य । सेठ नरसिंह भाई । केसवजी केन स्थापना कारापिता । पूर्णिमा विजय गच्छे । जं । यु । प्र । भट्टारक जिन शांति सागर सूरिभिः । प्रतिष्ठितं ॥ स्थापितं च । शुभं भवतु ॥

(371)

॥ संवत् १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंदेन श्री शांति नाथ पादुका कारापिता प्रतिष्ठितं च सर्व्व सूरिभिः श्री मत्तपा गच्छे ॥

(372)

॥ संवत् १९३१ । माघे । शु । १० । चंद्रे । श्री शांतिनाथ जिनेंद्रस्य । चरण पादुका जीर्णोद्धार रूपा । अहमंदावाद वास्तव्य । सेठ भगु भाइ पेम चंदेन स्थापना कारापिता । पूर्णिमा बिजय गच्छे । जं । युग प्रधान । भ । श्री पूज्य श्री जिन शांति सागर सूरिभिः प्रतिष्ठितं स्थापितं च ॥

(373)

॥ संवत १९२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंदेन श्री कुंथुनाथ पादुका कारापिता प्रती० श्री तपा गच्छे ।

(374)

॥ संवत् १८३१ माघ शुक्ले १० चंद्रो श्री कुंथु जिनेंद्रस्य । चरण पादुका - - जीर्णोद्धार रूपा मम्बई वास्तव्य सेठ केसवजी नायकेन स्थापना कारिता – -- पूर्णिमा । श्री विजय गच्छे । श्री जिनचंद्र सागर सूरि पट्टोदय प्रभाकर - - भट्टारक श्री जिन शांति सागर सूरिभिः । प्रतिष्ठिता स्थापिता च ।

(375)

॥ सं० १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय सा० खुसाल चन्देन श्री अरनाथ पादुका कारापिता प्र० श्री तपा गच्छे ।

(376)

॥ संवत् १९३१ । माघे । शु । १० । चंद्रे । श्री अरनाथ जिनेन्द्रस्य । चरण पादुका जीर्णोद्धार रूपा । गुजरातका श्री संघेन तया स्थापना कारापिता मल॥ पूर्णिमा । विजय गच्छे । जं । यु । प्र । भ । श्री जिन शांति सागर सूरिभिः । प्रतिष्ठितं ।

(377)

॥ संवत् १८२५ वर्षे माघ मासे शुक्ल पक्षे ३ गुरौ विरानि गोत्रीय साह खुसाल चंदेन । श्री मल्ली नाथ पादुका कारापिता प्र० श्री तपा गच्छे ।

(378)

॥ संवत् १९३१ माघे । शु । १० चंद्रे । श्री मल्लि नाथ जिनेंद्रस्य । चरण पादुका जीर्णोद्धार रूपा अहमंदावाद वास्तव्य । सेठ भगु भाई पेम चंद स्थापना कारापिता मलधार पूर्णिमा। श्री मद्वि जय गच्छे। भट्टारक । श्री पूज्य। श्री जिन शांति सागर सूरिभि प्रतिष्ठितं । स्थापितं च ॥

(379)

॥ सं० । १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंद्रेण श्री सुव्रत जिन पादुका कारिता श्रीमत्तपा गच्छे ॥

(380)

॥ संवत् १९३१ माघे । शु । १० । श्री मुनि सुव्रत जिनेंद्रस्य । चरण पादुका। जीर्णोद्धार रूपा । गुजरातका । श्री संघेन स्थापना कारापिता । मल । पूर्णिमा । श्री मद्विजय गच्छे श्री जिन शांति सागर सूरिभिः । प्रतिष्ठितं ॥ स्थापितं च ॥

(381)

॥ संवत १८२५ वर्षे माघ सुदि ३ गुरौ विरानी गोत्रीय साह खुसाल चंदेन श्री नमि-नाथ पादुका कारापिता प्रतिष्ठिता सर्व सूरिभिः श्री तपा गच्छे।

(382)

॥ संवत १९३१ माघ शुक्ले दशम्यां चंद्रवासरे श्री नमिनाथ जिनेंद्रस्य चरण पादुका। जीर्णोद्धार रूपा। अहमंदावाद वास्तव्य। सेठ उमा भाई हठी सिंहेन स्थापना कारापिता। पूर्णिमा विजय गच्छे भट्टारक। श्री जिन शांति सागर सूरिभिः। प्रतिष्ठितं॥

तेजपूर (आसाम)

राय मेघराजजीका मंदिर।

(383)

संवत १५१३ वर्षे वैशाष शुदि ७ शनौ श्रीश्रीमाल ज्ञातीय श्रे० सानंद भार्या हीसू सुत पूनसीकेन मातृपितृ श्रेयोर्थं श्रीशीतलनाथ विंवं कारितं प्रतिष्ठितं श्री सूरिभिः।

(384)

सं० १९४३ का मिति वैशाष शुक्ल सप्तम्यां ----

(385)

सं० १९५७ वर्षे ज्ये० शु० १२ तिथौ शुक्रवासरे॥ श्री जिन कीर्त्ति सूरि प्रतिष्ठितं श्री जिनदत्त सूरि नाम पादुका का०।

कलकत्ता

श्री कुमरसिंह हल - नं० ४६ इंडियन मिरर स्ट्रीट।

धातुयोंके मूर्त्ति पर.।

(386)

श्रीपार्श्वनाथ विंव।

ब्रह्माण सत्व संयकः श्रियावे सुनः सुपुण्यक श्री द्वः (?) सीलगण सूरि भक्तस्प (?) द्रकुले कारयामास संवत १०३२

(387)

सं० ११५० ज्येष्ठ सुदि १० श्री महेशराचार्य श्रावक पूना सुताभ्यां पाल्हण राल्हणाभ्यां स्वमातृ सोमा श्रेयसे चतुर्विंशतिः कारिता ॥

(388)

ॐश्री मूलसंघे गुणभद्र सूरेः संडिल्ल (खडिल्ल = खंडेल ?) वालान्वय सारभूतः ।
यो विस्तु (श्रु) तोसौ सिवदेवि पुत्रः सच्छ्रावकोऽभून्मुनिचंद्र नामा ॥ १
तस्माच्छीतेति विख्याता भार्या शील विभूषणा ।
कारिता कर्मनाशाय चतुर्विंशतिका शुभा ॥ २ संवतु १२३९ फा सु० २ गुरौ ॥

(389)

संवत १४८५ वर्षे जेठ सुदि १३ चंद्रवारे उपकेश गच्छे कक्क० उ०केश ज्ञातीय बापणा० सा० छाहउ त्रजीदा (?) भा० जईतलदे पु० साचा माय — सिवराजकेन मातृपितृ श्रेयसे श्री शांतिनाथ विंबं कारा० प्रतिष्ठितं श्री सिद्ध सूरिभिः ।

बडाबजार–पंचायति मंदिर ।

(390)

रीषभनाथ नीतनाग पतीलं मुलसरक ॥ सं० १०८३ वै० सु० १५

[पृ० २२ के लेख नं० (८८) का संशोधित पाठ]

संवतु ११५४ माघ सुदि १४ पद्मप्रभ सुत स्थिरदेव पत्न्या देवसिया श्रेयो नूहेन ॥ करिता ।

यति पन्नालालजी मोहनलालजीका घर देरासर।

(391)

॥ संवत १५०६ वर्षे श्री श्रीमाल ज्ञातीय दोसी डूंगर भार्या म्यापुरि सुत पूजाकेन भार्या सोही सुत खीका युतेन आत्मश्रेयसे श्री सुविधिनाथादि चतुर्विंशति पट्ट कारितः। आगम गच्छे श्री अमरसिंह सूरि पट्टे श्री हेमरत्न सूरि गुरूपदेशेन प्रतिष्ठितः॥ गंधार वास्तव्य॥ शुभं भवतु॥ श्रीः॥

(392)

सं० १५१६ वर्षे फा० शु० ८ प्राग्वाट सा० जोगा भा० मरगदे सुत सा० हदाकेन भा० करमी पु० पाल्हादे कुटुम्ब युतेन स्वश्रेयसे श्री विमलनाथ बिंबं का० प्रतिष्ठितं तपागच्छे श्री सोमसुंदर सूरि पट्टे श्री रत्नशेषर सूरिभिः।

(393)

सं० १७७१ वै० वदि ५ गुरौ प्राग्वाट ज्ञातीय वृद्धशाषायां सा० प्रेमचंद ग्रामीदास स्वश्रेयसे श्री शांतिनाथ प्रतिष्ठितं श्री विजय ऋद्धि सूरिभिः।

कलकत्ता अजायब घर (म्युजियम) के पाषाणके मूर्तियों पर।

(394)

--संवत १-८४ वर्षे ज्येष्ठ सुदि १५ गुरौ श्रीश्रीमाली ज्ञातीय जंबहरा स० केशव सुत सं० मंडिलक सुत० सं० चांपा भार्या चापलदे सुत सं० ---- भार्या श्री गांगी सुत-मेघाकेन भार्या राजु पुत्र सा० नाकर सा० मागादि तथा (?) पुत्री जीवणि प्रमुख रामसु (?) कटुम्ब युतेन निज श्रेयोऽवाप्ताय श्री श्रेयांसनाथ बिंबं कारितं॥ वृद्ध तपागच्छ नायक भ० श्री रत्नसिंह सूरि पट्टालंकरण भ० श्री उदय वल्लभ सूरिभि श्री ज्ञान सागर सूरि युतो प्रतिष्ठितं।

(395)

संवत १६०८ वर्षे माघ वदि ९ गुरौ प्राग्वाट ज्ञाती सा० राघव भा० रतना सा० नरसीआ भा० सुजलदे सा० रणमल भा० वेनीदे सुत लाला सीमल श्री संतनाथ विंवं प्रतिष्ठितं ।

म्युनिक (जर्मनि) के जादुघरके धातुकी मूर्त्ति पर ।

(396)

सं० १५०३ वर्षे माघ वदि ४ शुक्रे उ० गोष्ठिक आल्हा भा० शृंगारदे सुत सुडाकेन भा० सुहवदे स० आत्मश्रेयसे श्री पार्श्वनाथ विंवं कारि० प्र० जरापल्लिय श्री शालिभद्र सूरि पट्टे श्री उदय चन्द्र सूरिभिः शुभं भवतु ।

डाः कुमार स्वामिके पास 'समवसरण' के चित्र पर ।

(397)

संवत १६८० वर्षे भाद्रव शुदि २ श्री मदुत्तराध गच्छे आचार्य श्री कृष्ण चंद विद्यमाने लिः ऋषि ताराचंद शुभं भूयात् कल्याणमस्तु ॥ छ ॥

मेः लुवार्ड के मध्य भारतसे प्राप्त धातुकी मूर्त्तियों पर ।

(398)

सं० १५२७ पौष वदि ५ शुक्रे प्राग्वाट ज्ञातीय श्रे० सहिजक तत्पुत्र श्रे० डूंगर भा० श्रा० सुडि सपरिवार भा० सहिजलदे धरमसि करमण आदि पुत्रादि युतेन पुण्यार्थं श्री कुंथुनाथ विंवं का० तपागच्छे श्री लक्ष्मी सागर सूरिभिः प्रतिष्ठितं ।

(399)

सं० १५३३ वै० शु० १२ गुरौ प्राग्वाट ज्ञा० सा० तात्हा भा० राजु पु० सा० लिमचाक तत् भा० रत्न रुद्ध भ्राता सा० किवालघ मेघ आदि सपरिवारेन श्री कुंथुनाथ बिंबं का० प्रति० श्री तपगच्छाचार्य श्री लक्ष्मीसागर सूरिभिः श्री वसंतनगरे।

जैपुरके वेपारियोंके पासकी मूर्त्तियों पर।

(400)

सं० १४०५ वैशाष सु० ३ श्री उएस गच्छ तातहड़ गोत्र प्र० साः–ज्ज भा० ब्रह्मादे वही पुत्र संघ० सा० चाडूकेन सकुटुंबेन श्री रिषभ बिंबं का० प्र० श्री ककुदा चार्य संताने श्री कक्क सूरिभिः॥

(401)

सं० १५१२ वर्षे वै० शु० ५ ओसवाल गोत्रे सा० महणा भा० महणदे सुत सा० सीपा केन भा० सूलेसरि प्रमुख कुटुम्बयुतेन श्री आदिनाथ बिंबं का० श्री कक्क सूरिभिः॥

अजमेर राजपुताना म्युजिउमके वारलि गांवसे प्राप्त पत्थर पर। *

(402)

---विरय भगवत (त) -- थ -- चतुरासि तिवं (स) -- (का) ये सालिमा-लिनि -- रंनि विठमाझिमिके --

* इसमें श्री महावीर स्वामिका नाम, और ८४ वर्षमें मध्यमिका नगरका जो कि चित्तोड़से ४ कोस उत्तरमें था उल्लेख है और यह ई: ३। ४ पूर्व शताब्दि का वहोत प्राचीन लेख है ऐसा विद्वानोंका विचार है।

❋ बनारस ❋

काशीदेशका यह वाराणसी वा बनारस सहर जैनियोंका बहुत पवित्र स्थान है। हिन्दुओंका भी प्रसिद्ध तीर्थ है। यहां प्रतिष्ठ राजा और पृथ्वी राणीके पुत्र ७ मां तीर्थंकर श्री सुपार्श्वनाथजी का च्यवन और जेठ सुदि १२ जन्म, जेठ सुदि १३ दीक्षा, फागुन वदि ६ केवल ज्ञान और अश्वसेन राजा वामा राणी के पुत्र २३ मां तीर्थंकर श्री पार्श्वनाथजी का भी च्यवन, पोष वदि १० जन्म, पौष वदि ११ दीक्षा और चैत वदि ४ केवल ज्ञान यह ८ कल्याणक भये हैं। महल्ले भेलुपुरा और भदेनीमें मंदिर बने हुए हैं सहरमें कई एक मंदिर हैं। यहां से ४ कोस पर सिंहपूरी है यहां ११ मां तीर्थंकर श्री श्रेयांसनाथजी का च्यवन, फागुन वदि १२ जन्म, फागुन वदि १३ दीक्षा और माघ-वदि ३ केवल ज्ञान भया है। निकटमें बौद्धोंका सारनाथ नामक प्राचीन स्थान है।

सुत टोलेका मंदिर।

पंच तीर्थी पर।

(403)

सं० १५१५ वर्षे माह शुक्ल १३ दिने श्री ओसवाल ज्ञातीय श्रे० मूंधा भार्या माघलदे सु० धनदत्तेन पितृ श्रेयोर्थं श्री शितलनाथ विंवं पूर्णिमा पक्षे भ० श्री सागर तिलक सूरि पट्टे श्री महितिलक सूरि कारितं प्रतिष्ठितं श्री सूरिभिः॥

(404)

सं० १५५९ वर्षे आषाढ़ सुदि ८ दिने चंपकनर वासि श्रे० जावड़ भार्या पूरी सुत धर-णाकेन भार्या हर्षाई सुत नाकर प्रमुख कुटुम्ब युतेन श्रीशांतिनाथ विंवं श्री निगमागमा भार्या कारितं प्रतिष्ठितं श्री निगमा विभावक श्री इन्द्रनंदि सूरिभिः॥ श्रीः॥ श्रीः॥

बट्टूजीका मंदिर ।

(405)

सं० १५१२ वैशाष शु० ५ प्राग्वाट सा० लिया भा० लादां सु० साह हीराकेन भ्रा० संजत्री प्रमुख सुरत श्री-जिनावति का० प्र० तपा रत्न शेखर सूरिभिः ॥

पटनी टोलेका मन्दिर ।

(406)

सं० १४८५ वर्षे आ० सुदि १० रवौ माल्हू --ऊ० ज्ञा० साह वीजड पु० साह हरपाल भा० हेमादे पुत्र साह साडाकेन श्रीपार्श्वनाथ विंवं राजावर्त्तक रत्नमयं सपरिकरं का० प्रतिष्ठितं श्रीमल धारि गच्छे श्रीविद्यासागर सूरिभिः ।

(407)

सं १५८६ वर्षे वैशाप सुदि ३ भोमे श्री श्रीमाल ज्ञातीय परी० नरसिंघ भ्रातृपरी पनपा भार्या हीरूपुत्र कुरपालेन श्री श्री आदिनाथ विंवं कारितं प्रतिष्ठितं श्री सुविहित सूरिभिः ॥

चुन्निजी यतिका मन्दिर गणेशघाट ।

(408)

संवत १२५७ ज्येष्ठ सु० १० महेष्ठीराचार्य ---स्वमातृ सोमा श्रेयसे चतुर्विंशतिः कारिताः ॥

रामचन्द्रजी का मंदिर ।

(409)

सं० १४०६ वर्षे फागुन सु० ११ गुरौ सूराणा गोत्रे सा० जतरा शु० सा० जगद भार्या जयत श्री पु० नरपाल रणमीरभ्यां मातृ श्रे० महावीर बिं० का० प्र० श्रीधर्म घोष गच्छे श्री ज्ञान चंद्र सूरि शिष्यै श्री सागरचंद्र सूरिभिः ॥

(410)

सं० १४५९ ज्यैष्ठ वदि १२ शनौ सूराणा गो० सा० अमर भा० अइहव दे सुत सा० ताला साल्हा श्रेयसे श्री पार्श्वनाथ वि० का० प्र० श्रीधर्म घोष ग० भ० श्रीमलय चन्द्र सूरिभिः ॥

(411)

सं० १४८१ वर्षे वैशाष वदि ८ शुक्रे श्री उकेश वंशे मणी सा० पासड भार्या पाल्हण देवी सुत सा० सिवाकेन सा० सिघा मुख्य ४ जिनोनुजैः सहितेन स्वश्रेयसे श्री आदिनाथ विंवं श्री अंचल गच्छेश श्री जय कीर्त्ति सूरीन्द्राणामुपदेशेन कारितं प्रतिष्ठतं श्री संघेन॥ शुभं भवतु सर्वदा सर्व कुटुम्ब ॥ श्रीः ॥

(412)

सं० १५०७ वर्षे मार्गशिर सुदि २ शुक्रे श्रीमाल ज्ञातीय गोवलिया गोत्रे सा० हेमा --- पु० --वाल्हा उपा ---- उपदेशेन विमलनाथ विंवं का० प्रति० पवीर्य गच्छे श्री यशो देव सूरिभिः ॥

(413)

सं० १५४९ वर्षे ज्येष्ठ सुदि १३ घेवरिया गोत्रे श्री माल बीलीज देवी गोवेद पु० पीमा पु० सा० सिंघण सुमेरू आत्म पुण्यार्थं कुंथुनाथ विंवं श्रीमल धार गच्छे भ० गुण कीर्त्ति सूरि प्रतिष्ठितं वा० हर्ष सुन्दर शिष्य उपदेशेन ।

(414)

सं १५६२ वर्षे वैशाष सु० १० रवौ श्रीमाल मउवीया गोत्रे सा० परसंसाने सा० पहराज पुत्र सा० ईसरेण भा० तिलकू पु० त्रिपुर दास युतेन पार्श्वनाथ विंवं स्वपुण्यार्थं कारितं। प्र० श्री खरतर गच्छे श्री जिन तिलक सूरि प० श्री जिनराज सूरि पट्टे श्री भिः॥

श्रीकुशलाजी का मन्दिर—रामघाट।

(415)

सं० १३७९ ज्येष्ठ वदि ७ शुभ दिने श्रीषंडेरकीय गच्छे श्रीवाहड़ भार्य धीरु पु० धरा ---मयणल्ल---णिग भार्या केल्हंण सहितेन विंवं कारितं प्र० श्री सुमति सूरिभिः।

(416)

सं० १५०३ वर्षे ज्येष्ठ सुदि १० गुरौ उके० व० सा० रेडा भार्या रण श्री पुत्र पद सादा जीतकेन श्री अंचल गच्छेश श्री जय केसरि सूरीणामुपदेशेन श्री संभवनाथ विंवं का० प्रतिष्ठितं च॥ श्री॥

(417)

सं० १५०९ वै० वदि० ११ शुक्रे श्री कोरंट गच्छे श्री नन्नाचार्य संताने उवएश वंशे डागलिक गोत्रे साह धना पु० स० पासवीर भार्या संपूरदे नाम्न्या निज श्रेयोर्थं श्रीकुंथनाथ विंवं कारापितं प्र० श्रीकक्क सूरिपट्टे सद गुरु चक्रवर्त्ति भट्टारक श्री सावदेव सूरिभिः।

(418)

सं० १५१९ वर्षे आषाढ़ वदि १ मंत्रि दलीय काणा गोत्रे ठ० नाग राज सु० लडू भाय धर्मिणि सु० सं० श्री केवल दास भार्या वीर सिंघि पु० स० सूर्यसेन श्रावकेण श्री कुंथुना विंवं कारितं० प्र० श्री खरतर गच्छे श्री जिन सागर सूरि पट्टे श्रीजिन सुन्दर सूरि पट्टे श्री जिन हर्ष सूरिभिः॥

(419)

सं० १५१९ आषाढ़ वदि–मंत्रि दलीय श्री काणा गोत्रे ठा० लाघू भा० धर्मिणि पु० स० अचल दासेन पु० उग्रसेन लक्ष्मीसेन सूर्यसेन बुद्धिसेनादि युतेन श्री आदि विंबं का० प्र० श्रीजिन भद्र सूरि पट्टे श्रीजिन चंद्र सूरिभिः श्री खरतर गच्छे ॥ श्रीः ॥

(420)

सं० १५३६ वर्षे वै० वदि ११ ओसवंशे साह शिवराजभा० माणिकि सुत देवदत्त भा० रूपाई सुत साह कर्म सिहन भार्या हंसाई स्वकुटुम्व युतेन स्वश्रेयसे श्री संभवनाथ विंबं का० प्र० वृद्धतपापक्षे श्रीउदय सागर सूरिभिः श्री मंडुपे ।

(421)

सं० १५७० वर्षे माह सुदि ११ रवौ उपकेश वंशे छजलाणी गोत्रे साह श्री पाल भार्या सुहवदे पु० सा० ऊधा सा० जोधा ऊधा भार्या उमादे प्रमुख कुटुम्ब सहितेन श्री चंद्रप्रभ स्वामि विंबं कारितं नागुहरी तपागच्छे श्री सोम रत्न सूरि प्रतिष्ठितं तिजारा नगरे॥

प्रतापसिंहजी का मंदिर ।

(422)

सं० १५२० वर्षे पोष सुद १३ शुक्रे श्री ब्रह्माण गच्छे श्री श्रीमाल ज्ञातीय श्रे० मंडलिक सुत कामा भार्या कामीदे सुत झाझण नगराज रत्ना सहितेन आत्म श्रेयोर्थं श्री नमिनाथ विंबं का० प्र० श्रीशील गुण सूरिभिः पाटरी वास्तव्यः ।

(423)

सं० १५४८ वर्षे वैशाष शुदि ३ गुरौ श्री श्रीमाल ज्ञातीय श्रे० वीरम सु० वेला मातर भार्या सोही सु० महिराज जिणदास महिपति लहूआ कुटुम्व युतेन आत्म श्रेयोर्थं श्री श्रेयांस विंबं आगम गच्छे श्रीसोम रत्न सूरि गुरूपदेशेन कारितं प्रतिष्ठितं च विधिना धांदू वास्तव्यः ॥

सिंहपूरी ।

(424)

सं० १५३४ वर्षे मार्ग सुदि १० शनौ प्राग्वाट ज्ञातीय सा० राज भार्या बारू पु० सा० असपति भा० असल देवी माई सुत गुणराज सरादि कुटुम्ब युतेन श्री मुनि सुव्रत विंबं कारितं प्रतिष्ठतं श्री बृहत्तपाच्छे श्री उदयसागर सूरिभिः।

(425)

चरण पर ।

सं० १८५७ मिति चैत्रक मासे कृष्ण पक्षे षष्ठ्यां कर्म्मवा-पूज्य भट्टारक श्रीजिन हर्ष सूरि विजयराज्ये श्रीसिंहपूर ग्रामे तेषां केवलोत्पत्ति स्थाने गांधि गोत्रीय मयाचंद प्रमुख समस्त श्रीसंघेन श्री श्रेयांसाख्या नामेकादशानां लोक नाथानां पादन्यासः कारितः प्र० श्रीजिन लाभ सूरिणां शिष्यैः उपाध्याय श्रीहोरधर्म्म गणिभिः खरतर गच्छे ।

मिर्जापुर ।

पञ्चायती मन्दिर ।

(426)

श्रीपार्श्वनाथ विंब पर ।

सं० १३७९ वर्षे उएसज्ञातीय बावेला गोत्रे देवात्मज सा० घीका पुत्र संघपति झाझा सुत सा०-- जूकेन पितृ श्रेयसे का० प्रति० श्री कृष्णर्षिगच्छे श्री प्रसन्न चंद्र सूरिभिः ॥

(427)

सं० १४२० वर्षे वैशाष शुदि १० शुक्रे श्री श्री मालज्ञातीय ठ० बीजा भार्या मोहनदेवि श्रेयसे सुत जोलाकेन श्री पार्श्वनाथ विंबं कारितं प्रतिष्ठितं त्रिभवीया श्रीधर्म्मदेवसूरि संताने श्रीधर्म रत्न सूरिभिः ॥

(428)

सं० १४८२ व० वैशाप वदि १ प्र० फूलर गोत्र सा० लाहड भा० वाहिणदे पु० महिराज जिनपितृव्य सोमसिंह आत्म श्रे० श्री वासुपूज्य विंवं कारितं प्र० श्री धर्मघोष गच्छे श्री मलयचन्द्र सूरिपट्टे श्रीपद्मशेखर सूरिभिः ॥ छः । श्री ॥

(429)

सं० १४९० व० वैशाप वदि ९ कंठउतिया गोत्रे सा० कमसिंह पुत्र डालण तत्सुनाभ्यां स्वपूर्वज पूण्यार्थं श्रीकुंथु विंवं कारितं प्रति० श्रीहेम हंस सूरिभिः ॥

(430)

सं० १४९१ वर्षे फागुण सुदि २ सोमे श्री श्री माल ज्ञा० श्रे० देवस सुतवाछा भा० जसमादे सुत रागा भीमा षीमाभिः भ्रातृ षेता तथा पित्रोः श्रेयसे श्रीवासुपूज्य विंवं का० प्र० श्री पोपलगच्छे श्री सोमचन्द्र सूरिपट्टे श्री उदयदेव सूरिभिः ।

(431)

सं० १५१९ वर्षे माघ सु० ४ रवौ उपकेश ज्ञा० व्यव० गोष्ट सा० माडण भा० मोहणि पु० काल्हा भा० मालूरूपी सहितेन ॥ पित्रो श्रेयसे श्री नेमिनाथ विंवं कारितं प्रतिष्ठितं पूर्णिमापक्षे जयचंन्द्र सूरिपट्टे श्रीजयभद्र सूरिभिः ॥ : ॥

(432)

सं० १५२९ वर्षे माह व० ६ रवौ उप० ज्ञातीय कठउड़ गोत्रे सा० बरसा भा० माल्ही पु० रामा भाडा राजा चांदा भा० मरघू पु० जीवा समस्त कुटुंवेन पितृ श्रेयर्थं ·श्रीचन्द्रप्रभस्वामि विंवं कारा० प्रति० श्री चैत्रावाल गच्छे भ० श्री सोमकीर्त्ति सूरिभिः सद्रंछलिया नगरे ।

(433)

श्री मत्संवत १६७१ वर्षे वैशाष सुदि ३ शनौ श्री आगरा वास्तव्योसवाल ज्ञातीय लोढा गोत्रे गावं-ज्त्रा स० ऋषभदास भार्या रेषश्री तत्पुत्र श्री कुरपाल सोनपाल संघाधिपे स्वानुवर दुनोचंदस्य पुण्यार्थं उपकाराय श्री अंचलगच्छे पूज्य श्री ५ कल्याण सागर सूरिणामुपदेशेन श्री आदिनाथ विवं प्रतिष्ठापितं ॥

(434)

सं० १८७७ मि० फा० शु० १३ श्री कुंथुनाथ जिन विंवं दू० बिसनचंद्रेन कारितं प्रतिष्ठितं श्री जिनहर्ष सूरिभिः ॥

(435)

सं० १८९७ फा० शु० ५ श्रीपार्श्वनाथ वि० प्र० श्री पार्श्वनाथ वि० प्र० श्री जिन महेन्द्र सूरिण्युपदेशेन कारिता। सेठ उदयचन्द धर्म पती महाकुमारिभिदया। वाचनाचार्य श्री चारित्र नन्दन गणिभिर्देश---

(436)

सं० १८९७ फा० सु० ५ श्री आदिनाथ विंवं प्र० श्री जिनमहेन्द्र सूरिणा का० वोहरा नाथूराम पती साहवां नाम्न्यात्म श्रेयसे वाचक चारित्र नन्दन गण्युपदेशतः ॥

सेठधनसुखदासजी का मंदिर।

(437)

सं० १४९३ वर्षे माह वदि १ वुधे श्री श्रीमाल ज्ञातीय व्य० नरपाल भार्या नयणादे सुत देपाकेन श्रीपद्मप्रभ विंवं कारितं प्रतिष्ठितं। -- गच्छे श्रीगुणदेवसूरिभिः ॥

(438)

सं० १५३३ वर्षे माह सुदि १३ सोमदिने वघेरवाल ज्ञाती राय भंडारी गोत्रे सा० सीहा भा० पूरी पुत्र ठाकुरसी भा० महू पुत्र आका आत्मपूजार्थं श्री आदिनाथ त्रिंवं करापितं श्रीसर्व सूरिभिः शुभं भवतु ॥

(439)

सं० १८७७ वै० सु० १५ श्रीपार्श्वविंवं प्र० जिन हर्ष सूरिना कारितं। छजलानी चतुर्भुज पुत्र्या दीपो नाम्न्या चोरडिया मनुलाल वधू – –

(440)

सं० १८९७ का० भु० ५ श्रीपार्श्वविंवं प्र० श्रीजिन महेन्द्र सूरिणा का० । सकल श्रीसंघै ।

देहलि वा दिल्ली सहर ।

यह भारतवर्षका एक प्राचीन स्थान है । कुरु पांडवके समयमें यही 'इंद्रप्रस्थ' था । हिन्दुराजा पृथ्वीराजकी राजधानी थी । मुसलमानोंके समयमें बहुत काल तक यह राजधानी रही । कुछ दिनसे अपने सरकार बहादुरने भी दिल्लीमें भारतकी राजधानी स्थापनकी है और आज कल उन्नतिपर है, यहां से ४ कोस पर आचार्य महाराज श्रीजिन कुशल सूरिजीका स्थान है जिसको छोटे दादाजी कहते हैं और ७ कोसपर प्रसिद्ध कुतुव मिनारके पास बड़े दादाजीका स्थान है वहां कोई लेख नहीं है ।

चेलपुरी का मंदिर ।

धातुयोंके मूर्त्तिपर

(441)

सं० ११६३ मार्गशिर सुदि १ ओं गागसादेव धर्म्मोयम्– –(आगे अक्षर अस्पष्ट पढ़ा नहीं जाता)

(442)

सं० १५१६ वर्षे ज्ये० व० ११ शुक्रे सोमसर वासि उकेश सा० मेहा भा० माल्हणदे पुत्र सधाकेन भा० सल्ही प्रमुख कुटुम्बयुतेन श्री कुंथुनाथ विंवं कारितं प्रतिष्ठितं-- श्री कक्क सूरिभिः ॥ सचिंतीगोत्रे ॥

(443)

सं० १५२१ वर्षे माघ सुदि १२ बुधे लोढ़ा गोत्रे सा० हरिचन्द गोगा गोरा संताने साधु आसपाल पुत्रेण सं० तेजपालेन पुत्र परबत सांडादि युतेन भ्रातृ पूनपाल पुण्यार्थं श्रीपार्श्वनाथ विंवं कारितं प्रतिष्टितं तपागच्छे श्री हेमहंस सूरि पट्टे भ० । श्री हेम समुद्र सूरिभिः ॥

(444)

संवत १५२१ व० माघ सु० १३ प्राग्वाट श्रे० कटाया भा० रांउं सुत धुना भा० हमकू सुत चांपाकेन भा० धर्मिणि नामाणिकादि कुटुंवयुतेन स्वश्रेयोर्थं नेमिनाथ विंवं कारितं प्रति० तपागच्छे श्री लक्ष्मी सागर सूरि श्री सोमदेव सूरिभिः अहमदावादे ।

(445)

सं० १५३४ वर्षे ज्येष्ठ सुदि १० दिने उकेश वंशे साधुशाखायां सा० पाचा भा० पाल्ह-णदे तोल्ही सा० देपा भा० जयती पुत्र सा० षेताकेन तोल्ही पुत्र झांझां जाल्हा रूपा चांपा चरमा युतेन सा० पोपा पुण्यार्थं श्री मुनि सुव्रत का० प्र० खरतर गच्छे श्री जिन चंद्र सूरिभिः ।

(446)

सं० १५३६ माघ शुदि ५ दिने प्राग्वाट ज्ञाति सा० काजा भा० सारू पुत्र सा० हापा केन भा० नाई प्रमुख कुटुंवयुतेन श्री चन्द्रप्रभ विंवं कारितं प्रतिष्ठितं श्री तपागच्छे श्री लक्ष्मी सागर सूरिभिः ।

(447)

संवत १५६० वर्षे ज्येष्ठ वदि ४ दिने श्रीमाल वंशे सिंधुड़ गोत्रे व० अभय राज भार्या आमलदे पुत्र चउ० ठकुरसीहेन भा० ठकुरादे पुत्र व० भारमल्ल प्रमुख परिवृतेन श्री आदि जिन विंवं कारितं प्रतिष्ठतं श्रीखतर गच्छ श्री पूज्य श्री जिनहंस सूरिभिः।

(448)

सं० १५६६ वर्षे फागुण सुदि ३ सोमे ब्रह्माणीया गच्छे बहुरा हीरा भा० हीरादे पु० जीदा सोभा रूपा पुण्यार्थं श्री शांतिनाथ विंवं का० प्रतिष्ठितं श्री गुणसुन्दर सूरिभिः अहिलाणी।

(449)

॥ श्री पार्श्वनाथ स० १६०५ फागुन सुदी दसमी चरवडिया गोत्रे गागपती स्वर-मिनी पुत्र पेतु लघु अनमल गुरु श्री जिन भद्र सूरि रुद्रपली गच्छे भ० श्री भावतिलक सूरिभिः प्रतिष्ठितं श्री समेत सिषर।

(450)

सं० १६१२ वर्षे ज्येष्ठ सु० ११ शनौ उकेशवंशे----।

(451)

सं० १६६० वर्षे फागुण वदि ५ गुरुवासरे महाराजाधिराज महाराजा मानसिंघ जी राजे श्री मूलसंघे आम्नाये वलात्कार गणे सरस्वती गच्छे कुंदकुंदाचार्यन्वये भ० श्री विईं कीर्त्ति स्तदाम्नाय षंडेलवालान्वये पोस॥ सं श्री होला भा० कोसिगदे पु० भ० श्री कचराज भा० उमदे कोउमदे गुजरि पु० २ थातु दानु स० श्रीरायत भा० रयणदे---पु० हरदास---भा० महिमादे लाड़मदे --।

(452)

सं० १६७७ मार्ग शु०-रवौ श्रीमाल ज्ञातीय सा० तेजसी नाम्ना श्रीपार्श्व विंवं का० प्र० तपा गच्छे श्री विजयदेव सूरिभिः ॥

(453)

सं० १६८१ व० फा० शु० १० भ० चंद्रकीर्त्ति प्र० अग्रवाल ज्ञाती गोयल गोत्रे सा० नीमा भा० सरूपादे ।

(454)

नवपदजी पर ।

सं० १८५१ वर्षे कार्त्तिक मासे कृष्णपक्षे प्रतिपदा तिथौ गुरुवासरे- -सुश्रावक पुन्य प्रभावक देव गुरुभक्ति कारक फतेचन्द भार्या बिदामो तत्पुत्र बस्तिरामजी ॥ श्रीमाल ज्ञातौ ।

नवघरेका मन्दिर ।

मूलनायक श्रीसुमतिनाथजीके विंब पर ।

(455)

संवत १६८७ वर्षे ज्येष्ठ शुक्ला १३ गुरौ मेरुता नगर वास्तव्य दुहाड गोत्रे सं० जय-राव भा० सोभागदे पु० सं० ओहणकेन श्रीसुमतिनाथ विंब का० प्र० तपागच्छे भ० श्री विजयदेव सूरिभिः आचार्य श्री विजयसिंह सूरि परिवृत्तिः ।

सर्व धातुयोंके मूर्त्तियों पर।

(456)

ओं। संवत ११ ९७ वैशाष सुदि ५ श्री चंद्रप्रभाचार्य गच्छे सतु श्री वि---।

(457)

संवत १२८० वर्षे -----सांडा प्रणमंति ।

(458)

सं० १३३१ श्र० व० २ हल--- ।

459)

सं० १४३३ आषाड शु०--प्रा० लघु व्य० आसा भा० ललतदे--श्री पार्श्वनाथ विं० का० श्री गुणभद्र सूरीणामुपदेशेन।

(460)

सं० १४४५ पौष शुदि १२ वुधे ऊ० श्रे० जोला भा० हीरी पुत्र लालाकेन श्री शांतिनाथ विंवं कारापितं प्र० ऊ० गच्छे श्री सिद्ध सूरिभिः।

(461)

सं० १४५४ वर्षे ओढा गोत्रे उ० ज्ञा० सा० पोपा भा० पाषी पुत्र लाषाकेन स्वपुत्र वीसल श्रेयसे श्री पार्श्वनाथ विंवं का० श्रीरुद्रपल्लीय गच्छ सूरिभिः प्रतिष्ठितं श्रीदेव सुन्दर सूरिभिः।

(462)

सं० १४६३ वै० सु० १०-सा---

(463)

सं० १४७१ माघ शुदि १० रवौ प्राग्वाट ज्ञातीय साः रामा भा०--ठाकुर पितृ श्रेयोर्थं श्री आदि नाथ लक्ष्मी ---।

(464)

सं० १४७२ वर्षे फागुण सु० ९ शुक्रे ऊ० ज्ञा० सा० तिहुणा भा० तिहुणा(?)सोर पु० चाहड़ भा० केल्हु पु० हापा भा० तेजू पु० करमोकेन पितृ--श्री पद्मप्रभ बिं० का० प्र० श्री संडेर गच्छे श्री श्री यशोभद्र सूरि सं० श्री शांति सूरिभिः॥

(465)

सं० १४७९ वर्षे माघ सु० ४ दिने सा० धरणा पुत्र संग्राम समरासिंघ श्रावकः श्री महावीर विंबं पुण्यार्थं कारिते प्रतिष्ठितं श्री खरतर गच्छे श्री जिनभद्र सूरिभिः॥

(466)

सं० १४८२ वर्षे माह सुदि ५ सोमे नाहर गोत्रे सा० छाडा पु० जयता भार्या साल्ही पुत्र चोचाकेन पित्रो श्रेयोर्थं श्री पार्श्वनाथ विं० का० प्र० श्री धर्म घोष ग० श्री धर्म घोष ठा० श्री मलयचन्द्र सूरि पट्टे श्री--देव सूरिभिः।

(467)

सं० १४८२ वर्षे माघ सु० ५ सोमे ऊ० ज्ञा० पालडेचा गोत्रे सा० टापर भा० तेजलदे पु० अगड़ाकेन भा० सहितेन पित्रो स्वश्रेय० श्री वासुपूज्य विं० का० प्र० श्री सुविप्रभ सूरिभिः श्री वीरभद्र सूरि सहितेन॥

(468)

सं० १४८३ फा० व० ११ ऊ० ज्ञा० टपगोत्रे व्यव० रूपा भा० रूपाई पु० कालू पाचाभ्यां भ्रा० अदा भा० आल्हणदेवि: श्री पद्मप्रभ वि० का० प्र० श्री संडेर गच्छे श्री शाँति सूरिभिः ॥

(469)

सं० १४८६ वै० शु०–प्राग्वाट सा० साजण भा० लाषू पुत्र केल्हाकेन भा० लक्ष्मी भ्रातृ भीम पद्मादि कु० यु० श्री धर्मनाथ विंबं कारितं प्रति० तपा श्री सोमसुन्दर सूरिभिः श्री–५।

(470)

सं० १४८६ वर्षे जेष्ठ सु० १३ सोमे श्री दूगड़ गोत्रे सं० सिवराज भार्या सीधरही पुत्र सा० सोहिल घण राजाभ्यां पितुः श्रेयसे श्रीअजितनाथ बि० का० प्र० वृहद्ग० श्री मुनिश्वर सूरि पट्टे श्रीरत्नप्रभसूरिभिः ।

(471)

सं० १४९९ व० फा० व० २ उपकेश ज्ञातौ आदित्य नाग गोत्रे सा० देसल भा० देसलदे पु० धर्मा भा० सुहगदे युतेन स्व श्रे० श्री आदिनाथ विंबं का० उपकेश ग० ककुदाचार्य सं० प्रति० श्री कक्क सूरिभिः ।

(472)

सं० १५०४ वर्षे आ० सु० ६ श्री मूलसंघे भ० श्री जिनचंद्र देवाः जैसवालान्वये सा० लर भार्या रैनसिरि तत्पुत्र सोनिग भार्या षेमा प्रणमति ।

(473)

सं० १५०७ वर्षे ज्येष्ठ सु० २ दिने उकेश वंशे नाहटा गोत्रे सा० जयता भार्या जयतलदे तत्पुत्र सा० संगरेण पुत्र सलपा अजादि परिवार युतेन श्री सुमतिनाथ विं० का० प्र० श्री जिन भद्र सूरिभिः खरतर गच्छे।

(474)

सं० १५०७ वर्षे माघ सु० १३ शुक्रे श्रवाणागोत्रे उदा भार्या लाखि पु० देवराजेन स्व पुण्यार्थं श्री वासुपूज्य विं० का० प्र० श्री धर्मघोष गच्छे श्री पद्मसिंह सूरिभिः।

(475)

सं० १५०७ वर्षे वै० व० ५ दिने ऊकेश ज्ञातीय सा० चापा भा० चापलदे सुत गूंगब केन भा० बापू सु० बांईयादि कुटुम्बयुतेन श्री पार्श्वनाथ विं० का० प्र० तपगच्छेश श्री जयचन्द्र सूरि शिष्य श्री उदयनंदि सूरिभिः। कायपा ग्राम।

(476)

सं० १५०७ वष वैशाप वदि ६ गुरौ श्री श्रीमाल ज्ञातीय श्रे० बोडा भा० कुतिकदे तयोः सुताः श्रे० भार्या समरानायक पांचा एतेषां मध्ये श्रे० भादा भा० रूवकूकेन आत्म श्रेयोर्थं श्री मुनिसुव्रत स्वामि विंबं कारितं प्रतिष्ठितं श्री आगम गच्छे श्री शीलरत्न सूरिभिः गीलोपा वास्तव्यः।

(477)

सं० १५०७ वर्षे फा० सु०– सं० हमा पांयपुत्र सा० सारंग भार्या मचकु पुत्र नाथा भाडादि कुटुम्ब युतेन श्री सुपार्श्व का० तपा श्री सोम सुन्दर सूरि शिष्य श्री रत्नशेषर सूरिभिः।

(478)

संवत १५१२ वर्षे फा० शु० १२ दिने लोढा गोत्रे स० पासदत्त भार्या अपूदे तत्पुत्रं सा० कमलाकेन पुत्र जावा गोरादि परियुतेन श्रेयसे पुण्यार्थं श्री अभिनन्दन कारितं श्री खरतर गच्छे श्री जिनराज सूरि पट्टे श्री जिनभद्र सूरिभिः ॥ श्री ॥

(479)

सं० १५१३ वर्षे फा० वदि १२ ऊ० ज्ञा० सोधिल गो० रणसी पु० जहणा पु० वील्हा भा० जसमी पु० सादाकेन भा० चांदा सहितेन पितृ पुण्यार्थं श्री कुंथुनाथ बिं० का० प्र० श्री संडेगच्छे श्री यशोभद्र सूरि संताने श्री श्री ५ शांति सूरीणां पट्टे श्री ईश्वर सूरिभिः शुभं भूयाः ॥

(480)

सं० १५१५ वर्षे माघ सु० १४ दिने ऊ० वं० जांगड़ा गोत्रे सा० काल्हा भार्या झवकू सुत सा० रूपाकेन सपरिवारेण श्री सम्भवनाथ बिंवं कारितं प्रतिष्ठितं श्री ष० ग० श्री जिन सागर सूरि पट्टे श्री जिन सुन्दर सूरिभिः ॥

(481)

सं० १५१५ व० मा० सु० १ शुक्रे श्री श्रीमाल ज्ञा० श्रे० गूंगा भार्या लालू पुत्र जीवण केन पितृ मातृ निमित्तं आत्मश्रेयोर्थं श्री धर्मनाथ बिं० प्र० श्री नागेंद्र गच्छे श्री विनय प्रभ सूरिभिः काकरवारुलव्य ।

(482)

सं० १५१६ वर्षे वैशा० शु० १३ हस्तार्क दिने महतिआण सा० सुरपति भा० त्रिलोकादे पुत्र्या सा० ग्याल भगिन्या सा० चाचिग भार्या नारंगदेव्या श्री अजित बिंवं का० प्र० श्री खरतर गच्छे श्री जिन सागरसूरिपट्टे श्री जिनसुन्दर सूरिभिः ॥ श्री ॥

(483)

सं० १५१७ व० शु० ८ प्रा० सा० देपाल सु० हउसी करणा भा० षन्हड़ा धर्मा कर्मा हासा काला भ्रातृ हीराकेन भा० हीरादे सुत अदा वरा लाजादि कुटुंबयुतेन श्री शांतिनाथ विंवं का० प्र० तपा श्री सोमदेव सूरि शिष्य श्री रत्न शेषर सूरि शिष्य श्री लक्ष्मी सागर सूरिभिः ।। कमल मेरू ।

(484)

सं० १५२५ वर्षे मा० शु० ६ सीणुरा वासि प्रा० सा० राजा भा० स्या पूरि पु० सोपाकेन भा० रानू पुत्र सधारण हीरायुतेन श्री पद्म प्रभ विंवं स्वश्रेयसे का० प्र० तपा श्री सोम सुन्दर सूरि शिष्य श्री लक्ष्मीसागर सूरिभिः ॥

(485)

सं० १५३० फा० शु० २ गोखरू गोत्रे सा० पासवीर भा० कुडी नाम्न्या पुत्र साधारण पुत्र देवा सव--युत श्री मुनि सुव्रत स्वामि विंवं का० प्र० तपा गच्छनायक श्री लक्ष्मी सागर सूरिभिः ॥ वहादुर पुरे ॥

(486)

सं० १५३४ वैशाष सुदि ५ गुरौ ---सिवो पुत्र काला सिरिपुत्र--

(487)

सं० १५३५ श्री मूलसंघे भ० श्री भुवन कीर्त्ति स्व० भ० श्रीज्ञान भूषण गुरूपदेशात् ॥ स० षेतसी भा० झवूः ।

(488)

सं० १५३६ वर्षे फा० सुदि ३ दिने उकेश वंशे श्रेष्ठि गोत्रे श्री कीहट भार्या लपी पुत्र देवण मांडण धर्म्मा श्रावकैः श्रे० देवण भार्या दाडिमदे सुत समरादि परिवार युतैः श्री धर्मनाथ विंवं प्र० श्री खरतर गच्छे श्री जिन भद्र सूरि पट्टालंकार श्री जिन चंद्र सूरिभिः।

(489)

सं० १५३७ वर्षे वैं० शु० १० सोमे उमापुरवासि ज० व्य० महिराज भा० माणिकदे सु० श्रीपाल सहिजाभ्यां भा० सुहवदे । अदादि कुटुंबयुताभ्यां श्री वासुपूज्य विं० का० प्र० श्री लक्ष्मी सागर सूरिभिः ।

(490)

सं० १५४५ वर्षे वैशाष वदि ९ जडिया गोत्रे स० नासण पु० स० षिमधर नोका पोमा पागा पहिराज आढू लाल्ला लेपसी पितरनिमित्तं श्री शांतिनाथ विंवं कारापितं प्रतिष्ठितं तपागच्छे भट्टारक श्री सोमरतन सूरिभिः ॥

(491)

सं० १५४८ ज्ये० वदि ६ बुधे अ० श्री हेमचन्द्राम्नाये स० नगराज पु० दामू भा० स० हंसराज हापु --- ।

(492)

संवत १५५१ वर्षे वै० सुदि ६ रवौ उपकेश ज्ञातीय नाहर गोत्रे सा० लापा भार्या सोहिणी पु० चांपा भाय पौत्र पुत्र पौत्रादि सहितेन आत्मपुण्यार्थं श्री धर्मनाथ विंवं का० श्री धर्मनाथ विंवं का० श्री धर्मघोष गच्छे प्र० श्री पुण्यवर्द्धन सूरिभिः ।

(493)

संवत १५५३ वर्षे सिवनाग्राम वास्तव्य श्रीमाल ज्ञातीय वहकटा गोत्रे सा० जयत कर्ण सुत सा० जिणदत्त पुत्र सो० सोनपाल सुश्रावकेण भा० गउराई लघु भ्रातृ रत्नपाल पृथ्वीमल्ल सश्रो केण श्री शांतिनाथ विंबं कारितं प्रतिष्ठितं श्रीखरतर गच्छे श्री जिन चंद्र सूरि पट्टे श्री जिन समुद्र सूरिभिः ॥

(494)

सं० १५५३ व० आ० सु० २ रवौ श्री श्रीमाली ज्ञातीय सा० सीधर भा० सोही सुत सा० जूठा सा० संधा सा० भ--इ सा० पावाकै सा० जावड वचनेन श्री पार्श्वनाथ विंबं का० प्र० मलधार गच्छे श्री सूरिभिः। सर्वेषां पूजनार्थं ॥

(495)

सं० १५५९ वैशाषवदि १३ श्री मूलसघे पंडेलवाल सा० देवा पुत्र परवत नित्यं प्रण-मति गोधा गोत्रै।

(496)

सं० १५५९ व० पोस वदि ४ दिने गुरौ प्राग्वाट ज्ञातीय सा० राजा भा० राजलदे पु० पोमा भा० श्रमकू सु० श्रेयोर्थं श्री वासपूज्य विंबं का० प्र० महाहडीय गच्छे प्रतिष्ठितं श्रीमति सुन्दर सूरिभिः दघाली[illegible] वास्तव्यः।

(497)

सं० १५६२ व० वै० सु० १० रवौ श्री उकेश ज्ञातौ श्री आदित्यनाग पौत्रे चोरवेडिया शाषायां व० डालण पु० रत्नपालेन स० श्रीवत व० घघुमल्ल युतेन मातृ पितृ श्रे० श्री संभवनाथ वि० का० प्र० श्री उकेश गच्छे ककुदाचार्य० श्री देव गुप्तसूरिभिः ॥

(498)

सं० १५६२ वर्षे वैशाष शु० १३ बुधे श्री श्री मालीज्ञातीय सा० पूजा भात्र मूजा भा० विमलाई श्री मुनि सुव्रत स्वामि विंवं कारापितं-श्री साधुसुन्दर सूरि प्रतिष्ठितं ॥ श्री लषराज श्री अभयराज ॥

(499)

सं० १५६८ वर्षे माह सुदि ४ दिने उकेशवंशे नाहटा गोत्रे सा० राजा भा० अपू पु० सा० पीम भार्या रत्तू पु० श्रीपाल नाथूभ्यां मातृ पुण्यार्थं श्री चंद्रप्रभ विंवं का० प्र० श्री खरतर गच्छे श्री जिन हंस सूरिभिः ॥

(500)

सं० १५७४ वर्षे माह सु० १३ शनौ उ४ वं० पमार गोत्रे स० वक्राभा० वुलदे पु० सा० पतोला श्री अंचल गच्छेश भाव सागर सूरीणामुपदेशेन ।

(501)

सं० १५९९ वर्षे वै० सु० ५ गुरौ श्री रुद्र पल्लीय गच्छे भ० श्री गुण सुन्दर सूरि शिष्य उ० श्री गुणप्रभ -- श्री आदि नाथ विंवं का० प्रतिष्ठितं ।

(502)

सं० १६०८ वर्षे वैशाख सु० ३ सोम श्री मूलसंघे सरस्वती गच्छे भ० श्री ज्ञान भूषण देवा स्तत्पदे भ० श्री विजय कीर्त्ति देवास्तत्पट्टे भट्टारक श्री शुभचंद्रोपदेशात् हूंवड़ ज्ञातीय गंगागोत्रे । सं । घारा । भार्या सं ॥ घारु सुत सं० डाईआ भार्या सिरिक्षमणि । सुलसा० श्री पाल श्री शांतिनाथ विंवं कारापितं नित्यं प्रणमंति ॥

(503)

सं० १६१९ सिंघुड़ सा० गोपी भार्या विमला सुत धणराजेन कारितं ।

(504)

सं० १६४३ वर्षे फाल्गुन सु० ११ गुरु प्रा० ज्ञा० से विधोगा भार्या वाई पूराई सुत देवचन्द भार्या वाई हासो सुत रायचन्द भीमा श्री शीतलनाथ विंवं कारितं प्रतिष्ठितं वृहत्तपा गच्छे श्री विजयदान सूरि तत्पट्टे श्री हीर विजय सूरि आचार्य श्री विजयसेन सूरि श्री पत्तन वास्तव्यः ।

(505)

सं० १७०० फा० सु० १२ श्री मूल स० स्त्र० गच्छे व० ग० श्री कुंदकुंदाचार्यान्वये सं० सांवल । साकार-साहमल अ-जा । गा---।

(506)

सं० १७०१ व० मार्ग व० ११ दिने श्रीमाल ज्ञातौ वाई गूजरदे सुत स० हीराणंद भा० सबरंगदे श्री पद्मप्रभ विः का० प्रति० तपागच्छे श्री विजयसिंह सूरिभिः आगरा वा०

चीरेखानेका मन्दिर ।

(507)

सं० १४८९ वर्षे पौस वदि १० गुरौ श्री हुंबड़ ज्ञातीय श्रे० उदवसीह भार्या वईराऊ तयोः पुत्र तथा दौहीदा सुत दोगा--पत्नी वई चमक नाम्न्या आत्म श्रेयसे अजितनाथ --विंवं कारापितं श्रीवृहत्तपा पक्षे श्री रत्न सिंह--।

(508)

सं० १४९२ वैशाख सुदि २--ओसवाल ज्ञातिय भूरि गोत्रे--श्रीश्रेयांस विंवं का० प्र० श्री धर्मघोष गच्छे श्री श्री महेन्द्र सूरि प्र० --।

(509)

सं० १५०९ माघ सुदि ५ श्री ऊकेश वंशे चोपड़ा गोत्रे सा० ठाकुरसी सुत सा० कालू केन पुत्र मेघा माला नाल्हा पौत्र सुरजन प्र० परिवारेण स्वश्रेयोर्थं श्री विमल विंवं का० श्री खरतर गच्छे श्री जिनभद्र सूरिभिः प्रतिष्ठितं ।

(510)

सम्बत् १५१७ वर्षे फाल्गुण सुदि ९ गुरौ श्री श्री माल ज्ञातीय मंत्रि पोपा भार्या पाल्हणदे सुत मण्थाकेन भार्या सोहासिणि सुत उधरण प्रमुख कुटुंब सहितेन मातृ पितृ श्रेयोर्थं आत्म श्रेयोर्थं च श्री संभव नाथ चतुर्विंशति पट्ट जीवत स्वामी नागेन्द्र गच्छे श्री गुण समुद्र सूरेरुपदेशेन आचार्य श्री गुणदेव सूरिभिः प्रतिष्ठितं च चिमणीया वास्तव्यः । श्री ।

(511)

सं० १५-५ फा० वदि ९ सोमे प्रा० ज्ञा० --सा० घेरा भा० पूजी पुत्र पूना भा० ललतु पुत्र तोला ए० कर्मसिंह श्री संभव नाथ विंवं कारितं प्र० श्रीसर्व सूरिभिः ॥

(512)

सं० १६०५ फागुण सुदि दशमि समेत सिखरे प्रतिष्ठितं मागपत्तो त्वरमिनी पुत्र षवू लघु प्रनमल गुरु श्रीजिन भद्र सूरि --

(513)

सं० १६६३ वर्षे ज्ये० ब० ८ श्री-धर्मनाथ बिंबं प्रति०-।

(514)

सं० १७०३ वर्षे ज्ये० व० ७ शुक्रे श्री आसबाई नाम्न्या श्री पार्श्व बि० का० प्र० तप० ग० श्री विजय देव सूरिभिः।

(515)

सं० १७२५ वर्षे मार्गसिर सुदि ५ रवौ श्री मालदास भार्या --पार्श्व बि० करापित।

(516)

सं० १८५२ पोस सु० ४ दिने बृहस्पति वासरे श्री सि० च० यं० मिदं प्र० लालचन्द गणिना कारितं जैनगर वास्तव्य श्री माल रत्नचंद टोडरमल्लेन श्रेयोर्थं।

लाला हजारीमलजी का घर देरासर।

(517)

सं० १२१४ आषाढ़ सुदि २ श्री देवसेन संघे स० रामचन्द्र भार्या मना—।

(518)

सं० १३०७ वर्षे ज्येष्ठ वदि ११ गुरौ --- सुहव भा० ---।

(519)

ॐ संवत १३५० वर्षे ज्येष्ठ वदि ५ श्रीषंडेरगच्छे श्री यशोभद्रसूरि संताने । श्र० जगधर भार्या जमति पुत्र झांझण अरि सिंह लघुभ्राता अरिसिंहेन ज्येष्ठ भ्रातृ झांझण श्रेयसे श्री अजितनाथ विंबं कारितं । प्र० श्री सुमति सूरिभिः ॥

(520)

सं० १४६९ माघ सु० ६ सागरदास भार्या नालू -- ।

(521)

संवत १४८३ वर्षे श्री श्रीमाल ज्ञातीय वहरा धड़ला भार्या ललता देवि सांवलीदास हीराकेन भार्या हीरा देवि स० संघ श्रेयसे श्री शांतिनाथ विंबं कारित प्रतिष्ठितं । नागेंद्र गच्छे श्री रत्नप्रभ सूरि पट्टे श्री सह दत सूरिभिः शुभं भवतु ।

(522)

सं० १४८९ वर्षे माव वदि ११ बुध श्री देवीसिंग संघवी श्रे० कावा भार्या विजी-परनागड प्रणमति ।

(523)

सं १६६१ व० चै० वदि ११ शु० सा० बदी या कारितं श्रीपार्श्व विंबं प्रतिष्ठितं श्री खरतर गच्छे । श्री जिनचंद्र सूरिभिः ॥

(524)

संवत १५६६ वर्षे ज्येष्ठ सुदि ७ श्री मालज्ञातीय सिंधुड गोत्रे सा० चोल्हरण पु० सा० छेयतन श्री श्रेयांसनाथ विंबं कारितं प्र० श्रीजिनचंद्र सूरिभिः ।

(526)

सं॰ १९३५ वर्षे माव कृष्णा पंचमी भृगौ अहमदाबाद वास्तव्य ओसवाल ज्ञातीय वृद्ध शाषायां सा॰ हठी संघ केशरी संघ भार्या बाई रुक्मिणि स्वश्रेयोर्थं श्री शांतिनाथ बिंब कारापितं भट्टारक श्रीशांति सागर सूरिभिः प्रतिष्ठितं सागर गच्छे तपा बोरुदे ।

छोटे दादाजी का मन्दिर ।

(527)

संवत १८७१ वर्षे वैशाष शुक्ल पक्षे तिथौ ८ बुधे भट्टारक श्री जिन कुशल सूरि पादुका कारिता श्री स्याहजानाबाद नगर वास्तव्य श्री संघेन प्रतिष्ठितं च वृहद्भट्टारक खरतर गच्छीय श्रीजिनचंद्र सूरिभिः स्वश्रेयोर्थं श्री महाद्स्याह अकबर स्याह विजय राज्ये शुभं भूयात्॥ संवत् १९०८ मितो चैत्र शुदि १२ सूर्य्यवारे श्रीजिन नंदि वर्द्धन सूरिभिः विजय सधर्म राज्ये श्री दिल्लि नगर वास्तव्य सकल श्रीसंघेन जीर्णोधार पूर्वकं कारापितं पूज्या राधकानां मङ्गलमाला वृद्धितरां यायात्॥ श्रीमान्माणिक्य सूरि शाखायां पाठक मति कुमार तच्छिष्य हर्ष चंद्रोपदेशात्॥

(528)

॥ संवत १९२९ वर्षे वैसाष मास शुक्ल पक्षे ३ श्रीमाल ज्ञातीय धीधीद गोत्रे बखतावर सिंघकस्य भार्या महताब बीबी श्री शांतिनाथ बिं॰ प्र॰ करापितं प्रतिष्ठितं वृहत् खरतर गच्छे श्रीजिन श्रीकल्याण सू॰ ।

(529)

श्री सं० १९७२ मि: माघ शुक्ल ९ शनिवासरे रंग विजय खरतर गच्छीय जं० यु० प्र० भ० श्रीजिन कल्याण सूरि चरण पादुका कारापितं। इंद्रप्रस्थ नगर वास्तव्य समस्त श्री संघेन प्रतिष्ठितं जं यु० प्र० वृ० भ० रंग विजय खरतर गच्छीय श्री जिनचंद्र सूरि पदाश्रिते भ० श्री जिनरत्न सूरिभिः पूज्याराधकानां मंगल माला वृद्धितरां यायात् श्री संघस्य शुभं भूयात् ॥ श्री ॥

अजमेर।

यह भी प्राचीन नगर है। मुसलमानोंके पूर्वमें यहां श्री खरतर गच्छनायक महा प्रभाविक श्री जिनदत्त सूरि संवत् १२११ आषाड़ ११ देवलोक हुऐ।

श्री गौडी पार्श्वनाथका मंदिर।

पंचतीर्थीयों पर।

(530)

संवत् १२४२ आषाढ़ वदि—गुरौ श्री यश सूरि गच्छे श्रे० नागड सुत आसिग तत्पुत्र राल्हण थिरदेव मातृ सूहवादि पुत्रैः आसग श्रेयोर्थं पार्श्वनाथ विंबं कारापिता।

(531)

संवत् १४९५ वर्षे ज्येष्ठ सु० १३ उप० ज्ञातीय तातहड़ गोत्रे सा० वीकम भा० देवलदे पुत्र रेडा भा० हीमादे पुत्र सुहड़ा भा० सुहडादे पु० संसारचंद। सामंत सोभा स० श्री सुमतिनाथ विं० श्री उपकेश गच्छे ककुदाचार्य स० श्री सिंह सूरिभिः।

(532)

सं० १५०७ वर्षे वैशाष वदि ३ गुरौ श्री श्री माल ज्ञातीय श्रे० चांपा भा० चापलदे तयो सुता श्रे० व्यघा वीघा विरा भार्या षीमा पूना भगिनी हरषू एतेषां मध्ये पूनाकेन स्वमातृ पितृ श्रेयसे श्री संभवनाथ विंवं कारितं प्रतिष्ठितं श्री सूरिभिः अष्टार वास्तव्यः ।

(533)

सं० १५१३ वै० सु० २ सोमे उसवाल ज्ञातीय छाजहड गोत्रे माघाहरू पु० रानपाल भा० कपूरी पुत्र – हारलण भा० सारतादे माता डासाडा सहितेन श्री शीतलनाथ विं० प्र० श्री पल्लि गच्छे श्री यश सूरि ।

(534)

सं० १५१५ वर्षे फागुन सु० ९ रवौ ऊ० आईचणा गोत्रे सा० समदा भा० सवाही पुत्र दसूरकेन आत्मश्रेयसे सितलनाथ वि० का०—प्रति० श्री कक्क सूरिभिः ॥

(535)

सं० १५२१ वर्षे ज्ये० शु० ४ प्राग्वाट सा० जयपाल भा० वासू पुत्र्या सा० हीरा भा० हीरादे पुत्र सा० माउण भार्या रंगू नामा श्रेयसे श्री सुमतिनाथ विंवं का० प्र० तपापक्षे श्री रत्न शेषर पट्टे श्री लक्ष्मी सागर सूरिभिः ।

(536)

सं० १५२१ वर्षे ज्येष्ठ सु० १३ गुरौ श्री राजपुर वास्तव्य श्री श्री मालज्ञातीय श्रे० सारंग भार्या मवकू सुत लाईयाकेन भा० हीरू सुत गाईया गुदा प्रमुख कुटुम्बयुतेन भार्या श्रेयसे श्री संभवनाथ विंवं कारितं प्रतिष्ठितं वृहत्तपा श्री उदय वल्लभ सूरिभिः ॥

(537)

संवत १५२५ वष चैत्र वदि ९ शनौ प्राग्वाट ज्ञातीय श्र० सोमा भा० सूहूला सुत सिवा भार्या सोभागिणि सुत् पद्मा भार्या पहती श्री सुविधिनाथ विंवं का० सद्गुरूप देशेन विधिना प्र० विंवं----छ ॥

(538)

सं० १५२७ वर्षे पोष वदि १ श्री० प्राग्वाट ज्ञा० म० हेमादे सु० बईजा स्वसाकला नाम्न्या श्री नेमिनाथ विंवं कारितं प्र० वृद्ध तपापक्षे भ० श्री जिन रत्न सूरिभिः ।

(539)

सं० १५२८ माह व० ५ बुधे श्री ओस वंशे धनेरीया गोत्रे साह भाहड़ पुत्र वीका भार्या वील्हणदे पुत्रैः साह कोहा केल्हा मोकलाख्यैः स्वश्रेयसे श्रीधर्मनाथ विंवं का० श्री पल्लिवाल गच्छे श्री नन्न सूरिभिः प्र० ।

(540)

सं० १५७० वर्षे माघ वदि १३ बुधे श्री पत्तन वास्तव्य मोढ़ ज्ञातीय ठ० भोजा भार्या वाली सुत ० ठ० रत्नाकेन भार्या रूपाई सुत ठ० जसायुतेन श्री आदिनाथ विंवं कारितं स्व श्रेयोर्थं श्रीवृद्धतपा पक्षे श्री रत्न सूरि संताने श्री उदय सूरिः ॥ श्रीलक्ष्मी सागर सूरीणा पट्टे प्रतिष्ठितं श्री धन रत्न सूरिभिः श्री रस्तु ।

(541)

सं० १६०३ वष आषाड वदि ४ गुरौ भिन्नमाल वास्तव्य म० देवसी भा० दाडिमदे पुत्र मानसिंघ भा० षेतसी युतेन स्वश्रयसे श्री वासुपूज्य विं० का० प्र० तपगच्छे भ० श्री ५ श्री विजयदेव सूरिभिः ।

(542)

सं० १६८३ वर्षे आषाढ़ वदि ४ गु० उसवाल ज्ञातीय वेद महता गोत्रे म० भयरव भा० भरमादे पुत्र मे० सुरताणाख्येन श्री सुविधिनाथ विंवं का० प्र० तपा गच्छे भ० श्री विजयदेव सूरिभिः ॥

(543)

संवत १६८७ वर्षें ज्येष्ठ सुदि १३ गुरौ मेडता नागर वास्तव्य उसभ गोत्र को० जयता भार्या जसदे पुत्र को० दीपा धनाकेन श्रीपार्श्व वि० का० प्र० तपा गच्छे भ० श्री विजय देव सूरिभिः स्वपद स्थापित श्री विजयधर्म-सू--।

श्री संभवनाथजी का मन्दिर ।

(544)

सं० १२९० माह सुदि १० श्रे० धन्नल सुत जैमल श्रेपोर्थं--कारितः ॥

(545)

सं० १३७९ वर्षे वै० वदि ५ गुरौ प्राग्वाट ज्ञातीय महं कंधा भार्या--- पुत्र माल्ह श्री शांतिनाथ वि० का० प्र० श्री महेंद्र सूरिभिः ।

(546)

सं० १४८१ माघ शु० १० प्राग्वाट --- स्व श्रेयसे पद्मप्रभ विंवं का० श्री सोम सुंदर सूरिभिः ।

(547)

सं० १४८१ वर्षे वैशाष सु० ३ रवौ रहूराठी (?) गोत्रे सा० बीजल भार्या विजय श्री पु० रावा----श्रेयोर्थं श्री अजितनाथ बि० प्र० श्री धम---श्रीपद्म शेषर सूरिभिः ।

(548)

सं० १४८५ वर्षे माघ सुदि १४ बुधे लिगा गोत्रे सा० माला सागू युतेन सा० जील्हाकेन निज पित्रोः श्रेयोर्थं श्री सुमतिनाथ विंबं कारितं प्रतिष्ठितं तपा गच्छे श्री हेम हंस सूरिभिः ।

(549)

॥ॐ॥ सं० १४८६ वर्षे माघ सु० ११ शनौ श्री षंडेरकीय गच्छे उपकेश ज्ञा० गूगलीया गोत्रे सा० म्हूण पु० षोना पु० नेमा पु० नूनाकेन भा० लषी पु० करमा नाल्हा सहितेन स्वश्रेयसे श्रीमुनि सुव्रत विंवं का० प्रतिष्ठितं श्री शांति सूरिभिः शुभं भूयात् ॥श्री॥

(550)

सं० १४८८ वर्षे पोष सु० ३ शनौ उकेश ज्ञातौ तीवट गोत्रे वेसटान्वये सा० दादू भा० अणुपदे पु० सचवीर भा० सेत्त पु० देवा श्री वंताभ्यां पित्रो श्रेयसे श्री विमलनाथ विंवं का० प्र० श्री उकेश गच्छे ककुदाचार्य संताने श्री सिद्ध सूरिभिः ।

(551)

सं० १४९० वै० सु० शनौ श्री मूलसंघे नंदिसंघे वलात्कार गणे सरस्वती गच्छे श्री कुंद कुंदाचार्यान्वये भट्टारक श्री पद्मनंदि देवाः तत्पट्टे श्री सकल कीर्त्ति देवाः । उत्तरे

श्रवयोभि (?) हं० ज्ञातीय व० आसपाल भा० जाणी सु० आजाकेन भा० मघूसुत विरुआ भ्रातृ वीजा भा० वानू सुत समधरादि कुटुंब युतेन श्रीपद्म प्रभ चतुर्विंशति पट्टः कारितः तंच सदा प्रणमति सुकुटुंबः।

(552)

सं० १४९२ वर्षे मार्गशिर वदी ४ गुरुवारे श्री उपकेश वंशे लूसड गोत्रे सा० देव राज भार्या हेमश्रिया पुत्र सा० वाहडेन आत्मा कुटुंब श्रेयोर्थं श्री विमलनाथ विंवं कारापितं प्रतिष्ठितं श्रीधर्म्म घोष गच्छे भ० श्रीपद्मशेखर सूरिभिः।

(553)

सं० १४९९ माघ सु० ५ प्राग्वाट व्य० धीरा धीरलदे पुत्र्या व्य० भीमा भावल दे सुतव्य० वेला पत्नया वीरणि नाम्न्या श्रीसंभव विंवं का० प्र० तपा श्री सोम सुंदर सूरिभिः ॥श्री॥

(554)

सं० १५१६ वर्षे वैशाष वदि १२ शुक्रे श्री श्रीमाल ज्ञातीय पितृ सं० रामा मातृ शाणी श्रेयोर्थं सुत सागाकेन श्रीश्री अभिनंदन नाथ विंवं कारितं श्री पूर्णिमा पक्षे श्री साधुरत्न सूरिणामुपदेशेन प्रतिष्ठितं विधिना श्री संघेन गोरईया वास्तव्य ॥

(555)

॥ १५१६ आषाढ़ सु० ५ ओष्ठे गोत्रे सीवा भार्या रूपा पु० सोल्हा तेजा ----- पद्मावति प्रणमति।

(556)

सं० १५१७ वर्षे फागुन सुदि २ उकेश वंशे बुहरा गोत्रे सा० सोढा भा० शाणी पु० नगाकेन भा० नायक दे पुत्र नापा गोपा प्र० परिवार सहितेन स्वपितृ सा० सोढा पुण्यार्थं श्री श्रेयांस विंबं का० श्री खरतर गच्छे श्री जिन भद्र सूरि पट्टे श्री जिनचंद्र सूरिभिः प्रतिष्ठितं ।

(557)

सं० १५१७ वर्षे माघ सु० ५ शुक्रे प्राग्वाट ज्ञा० श्रे० डउढा भा० हरषू सु० श्रे० नागा भा० आजी सुत श्रे० जिनदासेन स्वश्रेयसे श्रीधर्मनाथ विंबं आगम गच्छे श्रीदेवरत्न सूरि गुरूपदेशेन कारितं प्रतिष्ठित ।

(558)

सं० १५१९ वर्षे ज्येष्ठ वदि ११ शुक्रे उपकेश ज्ञातीय चोरवेडिया गोत्रे उएस गच्छे सा० सोमा भा० धनाई पु० साधू सुहागदे सुत ईसा सहितेन स्वश्रेयसे श्री सुमति नाथ विंबं कारितं प्रतिष्ठितं श्रीकक्क सूरिभिः ॥ सीणोरा वास्तव्यः ॥

(559)

ओं संवत १२६५ वर्षे धर्कट वंशे भार्या जिन देवि तत्पुत्रा पंचगोसा० सदेव भार्या सुखमति तत्सुत थांथा काल्हा राल्ह घोर सीह पाल्हण प्रमुख गोसा पुत्र आमृ

वीर आम जाल काल्हा पुत्र लक्ष्मीधर महीधर राल्हण पुत्र आखे शूर घोरहसी पुत्र देव जस पाल्हण पुत्र घण चंडा रथ चंडादि स्वकलत्र समन्विताः स्व श्रेयोर्थं स्तंभ लगामिमं कारापयामासूः ।

(868)

ओं संवत १२६५ वर्षे उसभ गोत्रे श्रेष्ठि पार्श्व भार्या दूल्हेवि तत्पुत्र मगाकेन भार्या राजमति राल्हू तस्याः पुत्राश्चत्वारो लक्ष्मीधर अभय कुमार मेघ कुमार शक्ति कुमार लक्ष्मीधर पुत्र वीर देव अभय दे पुत्र सर्वदेवादिषु कुल कुटुंब सहितेन स्तंभन माकारितेदमिति - - - ।

(869)

ॐ संवत १२६५ वर्षे श्री नाणकीय गच्छे धर्कट गोत्रे आसदेव तत्सुत जागू भार्या-थिर मति तत्सुत गाहड़स्तस्य भार्या सातु तत्पुत्र आजमटादेः स्मुत्तिका सूरि काम कारयदात्म श्रेयसे ॥छ॥

फलोदी ।

यह स्थान मारवाड़के मेड़ता नगरके पास है ।

बड़े जैन मंदिरके देहलीके पत्थरों पर ।

(870)

संवत् १२२१ मार्गसिर सुदि ६ श्री फलवर्द्धिकायां देवाधिदेव श्री पार्श्वनाथ चैत्ये श्री प्राग्वाटे वंसीय रोपि मुणि मं० दसाढ़ाभ्यो आत्म श्रेयार्थं श्री चित्रकूटीय सिलफट सहितं चन्द्रको प्रदत्तः शुभं भवत् ॥

(871)

चैत्यो नरवरे येन श्री सल्लक्ष्मट कारिते। पंडपो मंडनं लक्ष्या कारितः संघ भास्वता ॥ १ ॥ अजयमेरु श्री वीर चैत्ये येन विधापिता श्री देवा बालकाः ख्याताश्चतुर्विंशति शिखराणि ॥२॥ श्रेष्ठो श्रो मुनि चंद्राख्यः श्री फलवर्द्धिका पुरे उत्तान पट्टं श्री पार्श्व चैत्येऽचीकरदद्भूतं ॥३॥

कोकिन्द ।

यह प्राचीन स्थान भी मारवाड़के मेड़ता जिलेमें है

श्री पार्श्वनाथजी का मंदिर ।

(872)

ॐ॥ संवत् १२३० आषाढ़ सुदि ९ श्री किष्कंधर दिवा प्रमुख वाला मलण बास ददिवा रावधो विधि चैत्ये मूल नायकः श्री आनन्द सूरि देशनया श्रे ॥१॥

(873)

ॐ॥ संवत १२३० आषाढ़ सुदि ९ किष्कंध विधि चैत्य मूल नायकः श्री आनंद सूरि देशनया श्रे० धाधल श्रे० वाला लण दास ददिवा पीवर दिवा प्रमुख श्राक – – ।

(874)

ॐ॥ नमो वीतरागाय ॥ श्री सिद्धिर्भवतु ॥ स्वस्ति श्रियामास्पदमापसिद्धिर्जगत्त्रये यस्य भवत् प्रसिद्धि। सोऽस्तु श्रिये स्फूर्ज्जदनंव रिद्धिरादीश्वरः शारद भास्य दिद्धि ॥१॥ यमार्हता शैव मताऽवलंबा। हिन्दु प्रकाराय नान प्रकाराः। सर्व्वेऽप्यमी

मोद भृतो भजंते। युगादि देवो दुरितं स्हंतु ॥२॥ दूर्व्वा प्रतारः सवट प्रसारः। कच्छ प्रसारो व्रतति प्रसारः। इमे समे कोटितमेऽपिभागेऽपत्य प्रसारस्य न यांति यस्य ॥३॥ गीर्व्वाण सालो नहि काष्ठ भावात्। तथा पशुत्वान्नहि कामधेनुः। मृदां विकारा-न्नहि काम कुंभश्चिंतामणिर्न्नैव च कर्क्करत्वात् ॥४॥ सूर्यो न तापाकुलता करत्वात्। सुधाकरोनैव कलंकवत् स्वात् ॥ सुवर्ण शैलो न कठोर भावात्। नाभ्यंगजातेन तुला-मुपैति ॥५॥ दुग्धो दधौ संस्थित तोय विंदून। पुष्पोच्चयान्नंदन कानन स्यान्। करोत्करान् शारद: चन्द्र सत्कान्। कश्चिन्मिमीतेन गुणान् युगादेः ॥६॥ यस्माद् जगत्यां प्रभवंति विघ्नाः। सुपर्व्वलोकादिव काम गव्यः। द्वयोऽपि वांच्छाधिक दान दक्षाः। पुष्णातु पुण्यानि स नाभि सूनुः ॥७॥ यतोंतराया स्त्वरितं प्रणेशु। मृगाधिराजा दिव मार्ग्गः पूगाः। यद्वा मयूरादि वले लिहानाः। स मारु देवो भवताद् विभूत्यै ॥८॥ राठोड वंश व्रतति प्रताना नीकोपमो नीक निकाय नेता। राजाधिराजो जनि मल्ल देव। स्तिरस्कृतारि प्रति मल्ल देवः ॥ ९ ॥ तस्मीरसस्सम जनिष्ट बलिष्ठ बाहुः प्रत्यर्थिता पनकदर्थन पर्व्व राहुः। श्री मल्लदेव नृप पट्ट सहस्र रश्मिः। श्री मानभूदुदय सिंह नृपः सरश्मिः ॥१०॥ कम धज कुल दीपः कांति कुल्या नदीप। स्तनु जित मधु दीपः सौम्यता कौमुदीपः। नृपतिरुदय सिंहा स्व प्रतापास्त सिंहः स्वितरद मुचुकुंदः सर्व्व निस्या मुकुन्दः ॥११॥ राज्ञां समेषामय मेव वृद्धो। वाच्यस्तद न्यैरथ वृद्ध राजः। यस्येति शाहिर्विरुदं समदद्या। दकव्वरो वर्व्वर वंश हंसः ॥१२॥ तत्पट्ट हेम्नः कष पट्ट शोभा। मयीभरत्संप्रति सूर सिंहः। यो माष पेषं द्विषतः पिपेष। निर्मूल काषं कषितार्त्तितांतिः ॥१३॥ राज्य श्रियां भाजन मिद्ध धामा। प्रताप मंदी कृत चंड धामा। संपन्न नागावलि नाव सिंहः पृथिवी पती राजति सूर सिंहः ॥१४॥ प्रतापतो विक्रमत स्च सूर्य। सिंही गतौ व्योम वनं च भीतौ। अन्वथंतो नाम जगाम सूर्य्य। सिंहे तियः सर्व्व जन प्रसिद्धं ॥१५॥ यदीय सेनोच्छलितै रजोभि। र्मलीमसांगो दिनसाधि नाथः। परो दधौ यस्त्र मिषेण मन्ये। स्नातुं प्रवेशं कुरुते खिनम्त्रः ॥१६॥ अप्येक मोहेतन

शुद्ध वंशो। धारे चकं तृप्ति युतो विशेषात्। स्वयं हतारातिं वसुन्धरा स्त्री परिग्रहात्त द्वहुता करस्सः ॥१७॥ तथापि राज्ञः परितोष भाजः। स्तुवंति विज्ञा विविधैः कवित्वैः। वहंति भक्तिं स्व कुटुंवलोका। अहो यशो भाग्य वशोपलभ्यं ॥१८॥ द्वाभ्यां युग्मं। सुरेष यद्वन्मघवा विभाति। यथैव तेजस्विषु चंड रोचिः। न्यायानुयायि ष्विव राम-चंन्द्र। स्तथाधुना हिन्दुषु भूधवोयं ॥१९॥ द्रव्य जिनार्चौचित कुंकमादि दीपार्थ मा जाद्यममारि घोषं। आचामतोम्लादि तपो विशेषं विशेषतः कारयते स्वदेशे ॥२०॥ ना पुत्र वित्ताहरणं न चौरी नन्या समोषो न च मद्य पानं। नाखेटको नान्य वशा निषेवे। त्यादि स्थितिः शासति राज्यमस्मिन् ॥२१॥ अभूद्भुधानो युवराज मुद्रां तस्मात्कुमारो गर्जसिंह नामा। गत्या गजोऽतीव बलेन सिंहस्ते नैव लेभे गर्जसिंह नाम ॥२२॥ श्री ओसबालान्वय वार्द्धिचन्द्रः। प्रशस्त कार्येषु विमुक्त तंद्रः। विज्ञ प्रगेयो षितवाल गोत्रः पणेष्वपिस्त्रेष्व चलत्व गोत्रः ॥२३॥ आसीन्निवासो नगरांतरेच। प्रायः प्रभूतैर्द्र-विणैरुपेतः जगाभिधानो जगदीश सेवा। हेवाभिरामो व्यवहारि मुख्यः ॥२४॥ द्वाभ्यां युग्मं। विद्यापुरः सूरि सुवाचकानां। करे पुरे योधपुराभिधाने। दंतं प्रमाणाद्द्वया जगाख्यः सएष तुर्य व्रतमुच्चचार ॥२५॥ सदंगजन्मा जनित प्रमोदः पुण्यात्मनां पुण्य सहाय भावात्। विशिष्ट दानादि गुणैः सनाथो। नाथा भिधो नाथ समाप्त मानः ॥२६॥ तस्योज्वलस्फार विशाल शाला। भार्या भवद्गू जर दे सुनामा। रूपेण वर्या गृह भार धुर्या। श्री देव गुर्वोः परिचर्य यार्या ॥२७॥ असूत सा पूर्व दिगेव सूर्यं। मुक्ता मणिं वंश विशेष यष्टिः। वज्रांकुरं रोहण भूमि केव। नापाभिधानं सुत राज रत्नं ॥२८॥ गुणैरनेकैः सुकृतै रनेकैः। लेभे प्रसिद्धि भुवि तेन विष्वक। तदर्थिनोन्येपि समज्र्जयंतु। गुणान्सपुण्यान्विधुवद्विशुद्धान ॥२९॥ तस्यासीन्नवलादे। वनिता वनितार सार रूप गुणा। शीलालंकृत रम्या गम्या नापाह्वये नैव ॥३०॥ आसाभिधानोह्यमृता-भिधश्व। सुधर्म्म सिंहोप्युदयाभिधोपि। सादूल नामेति च संति पंच। तयोस्तनूजा इव पांडु कुंत्योः ॥३१॥ आसा भिधानस्य बभूव भार्या सरूप देवीति तयोः सुतौ द्वौ।

तयोरभूदादिम वीर दासो। लघुश्चिरंजीवित जीव राजः ॥३२॥ वृद्धे तरस्याऽमृत संज्ञितस्य। मृगे चणाऽमोलक्ष देभिधाना। सुता बभूतामनयोस्तथा द्वौ मनोहराख्यो पर वर्द्धमानः ॥३३॥ सदा मुदे धारल दे भिधाना। सुधर्म्म सिंहस्य सधर्म्मिणीति। कुटुंबिनी साउछ रंगदेवी। प्रिया बभूवोदय संज्ञितस्य ॥३४॥ इति परिवार युत श्चोज्जयंत शत्रुंजये प्वकृत यात्रां। निधि शर नरपति १६५९ संख्ये। वर्षे हर्षेण ना पाख्यः ॥३५॥ अर्बुद गिरि राण पुरे नारदपुर्यां च शिवपुरी देशे। योत्रां युग षट् पद पद्। कला १६६४ मितेब्दे चकार पुनः ॥३६॥ श्रीविक्रमार्क्काद्दतु तर्क्क षडभू। वर्ष १६६६ गते फाल्गुन शुक्ल पक्षे। तौ दंपती स्वौ कुरुतः स्मतुर्य। व्रत तृतीया ह्नि रुप्य दानैः॥३७॥ दानं च शीलं च तथोपकार। स्त्रयात्मकोयं शुभ योग आस्ते। नापाभिधान व्यवहारि मुख्ये। यथार्हिलोके गुरु पुण्य पूर्णा ॥३८॥ भुजार्ज्जिताया निज चारु संपदो। न्याय-र्जितायाः फलमिष्टमिच्छता। वांणागषट् शीतगु १६६५ संख्य हायने। विधापित स्तेनहि मूल मंडपः ॥३९॥ चतुष्किके द्वेअपि पार्श्वयो र्द्वयो। र्नापा भिधानेन विधापिते इमे। पित्रोर्यशः कीर्त्ति रुभे इव स्वयोः। कर्त्ता द्वयं तोडर सूत्र धारकः ॥४०॥ विविध वादि मतं गज केसरी। कपट पंजर भंग कृते करी। भव पयोधि समुत्तरणे तरी। प्रबल धैर्य हरेवसनेदरी ॥४१॥ असम भाग्य पथश्चयसागरः। स्त्र गुण रंजित नायक नागरः। विजय सेन गुरुस्तप गच्छ राड्। विजयते जय तेज उदाहृतः ॥४२॥ द्वाभ्यां युग्मं। तत्प-ट्टोदयि रवयो विजयंते विजय सूरीशः। श्री उचितवाल गोत्राश्वतंस तुल्या अनूचानाः ॥४३॥ तेषां निदेशेन सदो विभा करैः गंगा तरंगालिल सद्य शोभरैः। जिनालयोय प्रतिमा बधूवरै। प्रतिष्ठितो वाचक लब्धि सागरैः ॥४४॥ पंडित पंक्ति प्रभावः श्री विजय कुशल विबुध वरास्तेषां शिष्येणोद्य रुचिना प्रशस्तिरेषा विनि-रमायि ॥४५॥ श्री सहज सागर सुधी विनेय जय सागरः प्रशस्ति मिमां। उदली लिखदुत्कीर्णा वर तोडर सूत्रधारेण ॥४६॥

सेवाड़ी।

मारवाड़के गोड़वाड़ इलाकेके वालो जिलेके समीप यह प्राचीन स्थान है।

श्री महावीर जी का मंदिर।

(875)

ॐ ॥ सं० ११६७ चैत्र सु० ६ महाराजाधिराज श्री अश्वराज राज्ये। श्री कटुक राज युवराज्ये। समी पाठीय चैत्ये जगतौ श्री धर्म्मनाथ देवसां नित्य पूजार्थं। महा साहणिय पूअवि - - - पौत्रेण ऊरिाम राज पुत्रेण उप्पल राकेन। मां गढ आंबल ॥ वि० सल खण जोगरादि कुटुंब समं। पद्मांडा ग्रामे तथा मेद्रंचा ग्रामे तथा छेछड़िया मद्दड़ी ग्रामे ॥ अरहट अरहट प्रति दत्तः जव हारकः ॥ एक यः कोपि लोपयिष्यति ते स्मदीय धर्म्म भाग्याः सदा भविष्यंति। इति मत्वा प्रतिपालनीयं। यस्य यस्य यदा भूमिस्तस्य तस्य तदाफलं। वहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ॥१॥छ॥

(876)

ॐ ॥ स्वजन्मनि जनतायाजाता परतोषकारिणी शांतिः। विबुध पति विनुत चरणः स शांति नामा जिनो जयति ॥१॥ आसीदुग्र प्रतापाद्यः श्री मदण हिल भूपतिः। येन प्रचंड दोर्द्दंड प्रराक्रम जिता मही ॥२॥ तत्पुत्रः चाहमाना नामन्वये नीति सद्गृहः। जिन्द राजाभिधो राजा सत्यस शौर्य समाश्रयः ॥३॥ तत्त नूजस्ततो जातः प्रतापा क्रांत भूतलः। अश्वराजः श्रियाधारो भूपतिर्भूभृतां वरः ॥४॥ ततः कटुकराजेति तत्पुत्रो धरणी तले। जज्ञे स त्याग सौभाग्य विख्यातः पुन्य विस्मितः ॥५॥ तद्भुक्ती पत्तनं रम्यं शमी पाटी ति नामकं। तस्मास्ति वीर नाथस्य चैत्यं स्वर्ग्ग समोपमं ॥६॥ इतश्चासीद् विशुद्धात्मा

यशोदेवो बलाधिपः। राज्ञां महाजनस्यापि सभायामग्रणी स्थितः ॥७॥ श्री षंडेरक गच्छे बंधूनां सुहृदां सतां। नित्योपकुर्व्वता येन न श्रांतं समचेतसा ॥८॥ तत्सुतो बाहडो जातो नराधिप जन प्रियः। विश्व कर्म्मेव सर्व्वत्र प्रसिद्धो विदुषां मतः ॥९॥ तत्पुत्रः प्रथितो लोके जैन धर्म्म परायणः। उत्पन्नः थल्लको राज्ञः प्रसाद गुण मंदिर ॥ १० ॥ दया दाक्षिण्य गांभार्य बुद्धिचिद्धध्यान संयुतः। श्री मत्कटुक राजेन यस्य दानं कृतं शुभं ॥ ११ ॥ माद्येत्र्यंवक संप्राप्तौ वितीर्ण्णं प्रति वर्षकं। द्रम्माष्टकं प्रमाणेन थल्लकाय प्रमोदतः ॥१२॥ पूजार्घ्यं शांति नाथस्य यशोदेवस्य खत्तके। प्रवर्द्धयतु चंद्रार्क्कं यावदादनमुज्वलं ॥ १३ ॥ पितामहेन तस्येदं समीपाट्यां जिनालये। कारितं शांति नाथस्य बिंबं जन मनोहरं ॥१४॥ धर्म्मेण लिप्यते राजा पृथिवीं भुनक्ति यो यदा। ब्रह्महत्या सहस्रेण पातकेन विलोपयन् ॥१५॥ संवत् ११७२ ॥

(877)

ॐ ॥ संवत् ११९८ असौज बदि १३ रवौ अरिष्ट नेमि पूर्व्व दिसायां अपवरिका अग्रे भित्ति द्वार पत्रे चर्तुलभाते कर्त्तुमम च गोष्ठ्या मिलित्वा निषेधः कृतः ॥ लिखितं पं० अश्वदेवेन।

(878)

सं० १२४४ आसाढ बदि ९ रवौ श्री संभव देव फागुण सुदि ८ चवण - - - लर - - पधर - - - ॥ - - - - सुदि १४ जंसो - - - हेकर जिसं देव ॥ - - - सुदि १५ विरवार - - - - हेतु श्री बहेव ॥ - - - कार्त्तिक बदि ५ मणु - - - देव पास देव ॥ - - - सुदि ५ रवौ - - - ण शांवव ॥

(879)

ॐ ॥ सं० १२५१ कार्तिक वदि १ रवौ अश्व वासला नालिकेर ध्वजा खासटी मूल्यं

निज गुरु श्री शालि भद्र सूरि मूर्त्ति पूजा हेतो श्री सुमति सूरिभिः। प्रदत्तात् वलाः ५ मास पाटकेने चके व्ययनीयाः ॥छ॥

(880)

॥ ॐ ॥ संवत् १२९७ वर्षे ज्येष्ठ सुदि २ गुरौ बासहड़ वास्तव्य ऊजाजल गोत्रे श्रेष्ठि चांदा सुत नाना - - - - देव सधीरण सुत आस पाल गुण पाल सेहड़ सुत पूस देव साधूदेव पूसदेव सुत धण देव सहड़ भार्या शील पुत्रिका साजणि जाल्ह सती रण भार्या राहीअई - - - - सेहड़ भार्या अइइव सूमदेव भार्या मदावति सावदेव भार्या प्रहल सिरि कुटुंब समुदायेन सेहड़ेन भार्या समन्वितेन देव कुलिका कारापिता ॥ मेह पुत्रिका देह साहुसा उसभ दासेन सुभं भवतु ॥

सांडेराव।

यह भी मारवाड़के बाली जिलेमें है।

श्री शांतिनाथजी का मंदिर।

(881)

श्री षंडेरक चैत्ये पंडितः जिन चन्द्रेण गोष्ठियुतेन धीमता देव नाग गुरो मूर्त्ति कारिता थिरपाल मुक्ति बांछता सं० ११४९ वैशाख वदि-- ।

(882)

सं० १२ - - वर्षे फागुण सुदि १४ गुरौ अद्येह श्री षंडेरक निवासी श्रेष्टि गुणपाल पुत्रीकाया गो - - - ला - - सुखमिणि नामिकाया। श्री महावीर देव चैत्ये चतुष्किका कारापिता ।

(883)

ॐ ॥ संवत १२२१ माघ वदि २ शुक्रे अद्येह श्री केल्हण देव विजय राज्ये। तस्य मातृ राज्ञी श्री आनल्न देव्या श्री षंडेरकीय मूलनायक श्री महावीर देवाय चैत्र वदि १३ कल्याणिक निमित्तं राजकीय भोग मध्यात्। युगंधर्याः हाएल एकः प्रदत्तः। तथा राष्ट्रकूट पातू केल्हण तद्भ्रातृज ऊत्तमसीह सूद्रग काल्हण आहड आसल अणतिगादिभिः तला राभाव्यथस ? गटसत्कात्। अस्मिन्नेव कल्याण केद्र १ प्रदत्तः ॥१॥ तथा श्री षंडेरक वास्तव्य रथकार धणपाल सूरपाल जोपाल सिगडा अमियपाल जिसहडदेल्हणादिभिः चैत्र सुदि १३ कल्याणके युगंधर्याः हाएल एकं १ प्र – – – –

(884)

सम्वत् १२३६ कार्त्तिक वदि २ वुधे अद्येह श्री नड्डूले महाराजाधिराज श्री केल्हण देव कल्याण विजय राज्ये प्रवर्त्तमाने राज्ञी श्री जाल्हण देवि भुक्तौ श्री षंडेरक देव श्री पार्श्वनाथ प्रसापतः थांपा सुत राल्हाकेन भ्रा भ्रातृ पाल्हा पुत्र सोढा सुभकर रामदेव धरणि यशोहीष वर्द्धमान लक्ष्मीधर सहजिग सहदेव सहियगछा ? रासां धोरण हरिचन्द्र वर देवादिभिः युतेन म – – – परम श्रेयोर्थं विदित निज गृहं प्रदत्तः ॥ राल्हाश सत्क मानुषै वसद्भिः वर्ष प्रति द्रा० एला ४ प्रदेया। शेष जनानां वसतां साधुभिः गोष्टिकै सारा कार्या ॥ संवत १२६६ वर्षे ज्येष्ट सुदि १३ शनौ सोयं मातृ धारमति पुनः स्तंभकी उधृत। थांपा सुत राल्हा पाल्हाभ्यां मातृ पद श्री निमित्तं स्तंभको प्रदत्तः।

नाना

मारवाड़के बाली जिलेमें यह ग्राम है।

(885)

संवत १२०३ वैशाख सुदि १२ सोम दिने श्री महेंत सूरिभिः प्रतिष्ठितः समस्तः ॥

(886)

संवत १४२९ माह बदि ७ चंद्रे श्री विद्याधर गच्छे मोढ ज्ञा० ठ० रत्न ठ० अर्जुन ठं० सिहणा पुत्र झोल्द देव श्रेयसे भातृ टाहाकेन श्री पार्श्व पंचतीर्थी का० प्र० श्री उद० देव सूरिभिः।

(887)

सं० १५०५ वर्षे माह बदि ९ शनौ श्री ज्ञावकीय गच्छे महावीर विंवं प्र० श्री शांति सूरिभिः - - - - षभ ण जिन - - - भवतं

(888)

सं० १५०६ वर्षे माघ वदि ११ सा० दूदा वीर मं महिया - - - लहराज - - -

(889)

सं १५०६ वर्षे माघ बदि १० गुरौ गोत्र वेलहस ऊ० ज्ञातीय सा० रतन भार्या रतना दे पुत्र दूदा वीरम माह पादे पलूणा देव राजादि कुटुम्ब युतेन श्रीवीर परिकरः कारित प्रतिष्ठितः श्री शांति सूरिभिः।

(890)

॥ ॐ ॥ अथ संवत्सरे नृपे विक्रमादित्त समयात संवत १६५९ भाद्रपद मासा शुक्ल पक्ष ७ सातमी तिथौ शनिवारे। श्री बैद्य गोत्रे। श्री सविया किण्णोत्रजा। मंत्रीश्वर त्रिभुवन तत्पुत्र पूना० तत्पुत्र मुहता चांदा तत्पुत्र मु० षेतसी तत्पुत्र मुहता नीसल १ चाइमल २ वीसन पुत्र मुहता श्री उरजन तत्पुत्र मुहता पतागढ़ सिवाणे साको करी मूउ। पिता पुत्र मुहता श्री नाराइण १ सादूल २ सूजा ३ सिंघा ४ सहसा ५ मुहता श्री नारायण नु राणा श्री अमर सिंघ जी मया करेने गांव नाणो दीयो मुहतो नाराइंण अरहट १ साईमल देव श्री महावीर नु सतर भेद पूजा सारु केसर दीवेल सारु दीधो

हींदूनां बरोस। उत्थापे तियेनु गाईरो--सुंस। तुरक उत्थापे तियेनु सुयररी सुंस वले ----- को उथाप जो --- गांव नाणारो चढ़ियो गांव वीबलाणै-- वो-सि-ए। इ जाएन - गांव - द्रम १ चेटियो ---- तको उथाप जो। वीजोको उथापसी तिणनु गदहउ गाव मुहला श्री नारायण भार्या नवरंगदे तत्पुत्र मु० श्री राज-- जणयल --- दा पुत्री जषलो ---- नाराइण त्रिजी भार्या नवलदे पुत्र जसवंत १ सहितं श्री --- गच्छे भट्टारक श्री सिद्ध सूरि विद्यमाने ---। ० श्री ---- चंद शिष्य चांपा लिषितं। ए --- जको --- सिणु ----।

लालराई।

मारवाड़के वाली जिलेके समीप इस ग्रामके एक प्राचीन खंडर जैन मंदिरमें यह लेख है।

(891)

संवत् १२३३ वैशाख सुदि ३ संनाणक भोक्ता राज पुत्र लाखण पाल राज पुत्र अभय पाल तस्मिन राज्ये वर्त्तमाने चा० भीवड़ा पड़ि देह बसी सू० आसधर समस्त सीर सहितै वाड़ि सीर जव मध्यात् जवा से ४ गूजरी जात्रा निमित्तं श्री शांति नाथ देवस्य दत्ता पुण्याय य: कोपि लुप्यते स पापो न छिद्यतेमंगल भवतू॥ तथा भड़िया उअ अरहट्ट आसधर सीरोइय समस्त सीरण जवा हरोथु १ गूजर तृयात्रहि वील्हस्य पुण्यार्थं ॥ १ ॥

(892)

ॐ॥ संवत् १२३३ ज्येष्ठ बदि १३ गुरौ अद्येहं श्री नडूले महाराजाधिराज श्री केल्हण देव राज्ये वर्त्तमानः श्री कीर्त्तिपाल देव पुत्रै सिनाणकं भोक्ता राज पुत्र लाषण

पाल्ह राज पुत्र अभय पाल राज्ञी श्री महिबल देवि सहितैः श्री शांतिनाथ देव यात्रा निमित्तं भडिया उव अरघट उरहारि मध्यात् गूजर तृहार १ जवा ग्राम पंच कुल समक्षि एतत् - - - दानं कृतं पुण्याय साक्षि अत्र वास्त - - -द्रगण - - - सो० देवलये० समीपाटीय - - - पाजून आम्र - - - समक्ष आदानं - - - - मितस्य २ त - - - हत्या पातकेन लि - - - ११ ।

हठुंदी ।

मारवाड़ के गोड़वाड़ इलाके के बीजापुर के पास यह प्राचीन स्थान है ।

श्री महावीरजी का मंदिर ।

(893)

ॐ ॥ सं० १२९९ वर्षे चैत्र सुदि ११ शुक्रे श्री रत्न प्रभोपाध्याय शिष्यैः श्री पूर्ण चन्द्रोपाध्यायै रालक द्वय शिखराणि च कारितानि सर्वानि ।

(894)

ॐ सं० १३३५ वर्षे श्राम्वण वदि १ सोमे ऽद्यह समीपाट्टी । मंडपिकायां भां पाहट उभां वां । पथरा महं सजन उ महं० धीणा उधण सीह उ० व० देव सिंह प्रभृति पंच कुलेन श्रो राताभिधान श्री महावीर देवस्य नेचाप्रचयं ? वर्ष स्थिलिके कृत द्र० २४ चत्व विंशति । द्रम्माः वर्षं वर्ष प्रति समी मंडपिका पंच कुलेन दातव्याः पालनीयश्च बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः यस्य यस्य - - - यदा भूमि सस्य तस्य तदा फलं शुभं भवतु ॥

(895)

सं० १३३६ वर्षे श्रेष्ठिको नाग श्र। श्रे -- अर सोहेन सय पक्षे दत्त द्र० उभयं द्र ३६ समीपाटी मंडपिकायां व्याष्टपूय माण पंच कुलेन वर्ष वर्ष प्रति आचंद्रार्क -- यावत् दातव्याः। शुभमस्तु ॥

(896)

ओं नमो वीतरागाय संवट् १३४६ वर्षे श्रावण वदि ३ शुक्र दिने खहेड़ा ग्रामे महादपाल लभारावा कर्म सीहपा ----।

माताजीके मंदिरके स्तम्भ पर।

(897)

॥ ॐ ॥ नमो वीत रागाय ॥ संवत् १३४५ वर्षे प्रथम भाद्रवा वदि ९ शुक्र दिने अद्येह श्री नडूल मंडले महाराज कुल श्री सम्पंत सिह देव राज्येत्र तन्नियुक्त श्रा ॥ श्री करणे महं ललनादि पंच कुल प्रच्छति भूमि अक्षराणि पव्वा ॥ समो तल पदित्य मंडपिकायां साधू० हेमाकेन भाद्रि हाथीउड़ी ग्रामें श्री महावीर देव नेवार्थं वर्षं प्रति वर्त्ता -- क द्र २४ चरवविंसि द्रंमा० प्रदत्ता शुभं भवतु ॥ बहुभिर्वसुधा भुक्ता राजभि सगरादिपि। जस्य जस्य जदा भूमी तस्य तस्य वदा फलं ॥ कपूर विजय, लिषतं ॥

खण्डहर में मिला हुआ पाषाण पर।

(898)

..--॥ विरके -- पजे रक्षा सस्या जवस्तवः। परिशासतु ना'-- परार्थ ख्यापना जिनाः ॥१॥ ते वः पांतु जिना विनास समये यत्पाद पद्मोन्मुख प्रेंखा संख्य मयूख

शेखर नख श्रेणीषु विम्बोदयात्। प्रायैकादशभिर्गुणं दशशतो शक्रस्य शुभ्भद्र शांकस्य स्योद्गुण कारको न यदि वा स्वच्छात्मनां सङ्गमः ॥२॥ - - क्त - - नासत्करीलोप शोभितः। सुशेखर - - लौ मूर्द्धि रूढों महीभृतां ॥३॥ अभि बिभ्रद्रुचिं कांतां सावित्रीं चतुराननः हरिवर्म्मा बभूवात्र भूविभुर्भुवनाधिकः ॥४॥ सकल लोक विलोचन पंकज स्फुरदनं बुद बाल दिवाकरः। रिपु बधूवदनेन्दु हृत द्युतिः समुदपादि विदग्ध नृप-स्ततः ॥५॥ स्वाचार्यैर्यो रुचिर बचनैर्वासुदेवाभिधाने र्बोधं नीतो दिनकर करैर्न्नीर जन्मा करो व। पूर्व्वं जैनं निजमिव यशो कारयद्धस्तिकुण्ड्यां रम्यं हर्म्म्यं गुरु हिम गिरेः शृङ्ग शृङ्गार हारि ॥६॥ दानेन तुलित बलिना तुलादि दानस्य येन देवाय। भागद्वयं व्यतीर्यंत भागश्चाचार्य बर्याय ॥७॥ तस्मादभूच्छुद्ध सत्त्वो मंमटाख्यो महीपतिः। समुद्र बिजयी श्लाघ्य तरवारिः सदूर्म्मिकः ॥८॥ तस्माद समः समजनि समस्त जन जनित लोचनानंदः। धवलो बसुधा व्यापी चंद्रादिव चन्द्रिका निकरः ॥९॥ भंक्त्वाघाटं घटाभिः प्रकटमिव मदं मेदपाठे भटानां जन्ये राजन्य जन्ये जनयति जनताजं रणं मुंज राजे। श्रीमाणे प्रणष्टे हरिण इव भिया गूर्ज्जरेशे विनष्टे तत्सैन्यानां शरण्यो हरिरिव शरणेयः सुरणां बभूव ॥१०॥ श्री मद्दुर्ल्लभ राज भूभुजि भजैर्भंजत्य भंगां भुवं दंडैर्भण्डन शौंड चंड सुभटै स्तस्याभिभूतं विभुः। यो दैत्यैरिव तारक प्रभृतिभिः श्री मान्महेंद्रं पुरा सेनानोरिव नीति पौरुष परो नैषोत्परां निर्वृतिं ॥११॥ यं मूलादुद मूलयद्गुरु बलः श्री मूल राजो नृपो दर्प्पांधो धरणो बराह नृपतिं यद्वद्द्विपः पादपं। आयातं भुविकां दिशी कमभिको यस्तं शरण्यो दधौ दंष्ट्रायानिव रूढ मूढ महिमा कोलो मही मण्डलं ॥१२॥ इत्थं पृथ्वी भर्तृभिर्नाथ मानैः सा - - - सुस्थितैरास्थितोयः। पाथो नाथो वा विपक्षात्स्वपक्षां रक्षा कांक्षै रक्षणे बद्ध कक्षाः ॥१३॥ दिवाकरस्येव करैः कठोरैः करालिता भूर कदम्बकस्य। अशि श्रियं ताप हृतोरुतापं यमुन्नतं पादप वज्ज नौघा ॥ १४ ॥ धनुर्द्धर शिरोमणे रमल धर्म्ममभ्यस्यतो जगाम जलधेर्गुणो मुहरमुष्य पारंपरं। समोयुरपि सन्मुखाः सुमुख मार्ग्गणानां गणाः सतां चरितमद्भुतं सकलमेव

लोकोत्तरं ॥१५॥ यात्रासु यस्य वयदीर्ण्ण विषुर्व्विशेषात् वल्गत्तुरंग खुरखात मही रजांसि। तेजोभिरूर्जि र्ज्जत मनेन विनिर्जि र्ज्जत त्वाद्भास्वान्विलज्जि त इवांततरां तिरो-भूत् ॥१६॥ न कामनां मनो धीमान् घ – लनां दधौ। अनन्योद्वार्य सत्कार्य भार धुर्योर्य्य-सोपि यः ॥१७॥ यस्तेजोभिरहस्करः करुणया शौद्धोदनिः शुद्धया। भीष्मो वंचन वंचितेन वचसा धर्म्मेण धर्म्मात्मजः। प्राणेन प्रलाय निलो वलभिदो मंत्रेण मंत्री परो रूपेण प्रमदा प्रियेण मदनो दानेन कर्ण्णोभवत् ॥१८॥ सुनय तनयं राज्ये बाल प्रसाद मतिष्ठिप त्परिणतवया निःसंगो यो बभूत सुधीः स्वयं। कृत युग कृतं कृत्वा कृत्यं कृतात्म चमत्कृ-ती रकृत सुकृतीनो कालुष्यं करोति कलिः सतां ॥१९॥ काले कलावपि किलामलमेतदीयं लोका विलोक्य कलनातिगतं गुणौघं। पार्थादि पार्थिव गुणान् गणयन्तु सत्यानेकं व्यधा-द्गुणनिधिं यमितीव वेधाः ॥२०॥ गोचरयंति न वाचो यच्चरितं चंद्र चंद्रिका रुचिरं। वाचस्पते र्व्वचस्वी को वान्यो वर्ण्णयेत्पूर्ण्णं ॥२१॥ राजधानी भुवो भर्त्तु स्तस्यास्ते हस्ति कुण्डिका अलका धनदस्येव धनाढ्य जन सेविता ॥२२॥ नीहार हार हर हास हिमांशु हारि झात्कार वारि भुवि राज विनिर्ज्झराणां। वास्तव्य भव्य जन चित्त समं समंतात्संताप संपद् पहार परं परेषां ॥२३॥ धौत कल धौत कलशाभिराम रामास्तना इव न यस्यां। संत्य परेभ्य पहाराः सदा सदाचार जनतायां ॥२४॥ समद मदना लीलालापाः प - ना कुलाः कुवलय दृशां संदृश्यंते दृशस्तरलाः परं। मलिनित मुखा यत्रोद्वृत्ताः परं कठिनाः कुचा निविड रचना नीवी वंधाः परं कुटिलाः कचाः ॥२५॥ गाढ़ोत्तुंगानि सार्द्धं शुचि कुच कलशैः कामिनीनां मनोज्ञै र्व्विस्तीर्ण्णानि प्रकामं सह घन जघनैर्द्दैवता मंदिराणि। भ्राजंते दभ्र शुभ्राण्यतिशय सुभगं नेत्र पात्रैः पवित्रैः सत्रं चित्राणि धात्री जन हृत हृदयैर्व्विभ्रमैर्यत्र सत्रं ॥२६॥ मधुरा घन पर्व्वाणो हृद्यरूपा रसाधिकाः। यत्रेक्षु वाटा लोकेभ्यो नालि-केरवाद्विदेलिमाः ॥२७॥ अस्यां सूरिः सुराणां गुरु रिव गुरुभि र्गौर वार्हैं गुणौघै र्भू पालानां त्रिलोकी वलय विलसिता नंतरानंत कीर्त्तिः। नाम्ना श्री शांति भद्रो भवदभि भवितुं भास्मांना समानो कामं कामं समर्था जनित जनमनः संमदा यस्य मूर्त्तिः ॥२८॥ मन्येमुना मुनीन्द्रेण मनोभू रूप निर्जितः। स्वप्नेपि न स्वरूपेण समगन्स्तातिलज्जतः ॥२९॥

प्रोद्यत्पद्ममाकरस्य प्रकटित विकटा शेष भावस्य सूरेः सूर्यस्येवामृतांशुं स्फुरित शुभ रुचिं वासुदेवाभिधस्य। अध्यासीनं पदव्यां यम मल विलसज्ज्ञान मालोक्य लोको लोका लोकावलोकं सकलमचकलत्केवल संभवीति ॥३०॥ धर्म्माभ्यास रतस्यास्य संगतो गुण संग्रहः। अभग्न मार्ग्गणेच्छस्य चित्रं निर्व्वाण वांछना ॥ ३१ ॥ कमपि सर्व्वगुणानुगतं जनं विधिरयं विदधाति न दुर्व्विधः। इति कलंक निराकृतये कृती यमकृतेव कृताखिल सद्गुणं "३२॥ तदीय वचनान्निजं धन कलत्र पुत्रादिकं विलोक्य सकलं चलं दल मिवा-निलांदोलितं। गरिष्ठ गुण गोष्ठ्यदः समुददी धरद्वीर धीरुददार मति सुंदरं प्रथम तीर्थ कृन्मंदिरं ॥३३॥ रक्तं वा रम्य रामाणां मणि ताराव राजितं। इदं मुख मिवा भाति भास्व मान वरालकं ॥३४॥ चतुरस्त्र पट्ट ज्जन घाइ्डनिकं शुभ शुक्ति करोटक युक्त मिदम्। बहु भाजन राजि जिनायतनं प्रविराजति भोजन धाम समं ॥३५॥ बिदग्ध नृप कारिते जिन गृहेति जीर्ण्णे पुनः समं कृत समुद्धताविह भवांबुधिरात्मनः। अतिष्ठिपत सोप्यथ प्रथम तीर्थ नाथा कृतिं स्वकीर्त्तिमिव मूर्त्तामुपगतां सितांशु द्युतिं ॥३६॥ शांत्याचार्य्यैस्त्रि-पंचाशे सहस्रे शरदा मियं। माघ शुक्ल त्रयोदश्यां सुप्रतिष्ठैः प्रतिष्ठिता ॥३७॥ विदग्ध नृपतिः पुरा यद तुलं तुलादेर्द्ददौ सुदान मवदान धारिदम पोपलन्नाद्भुतं। यतो धवल भूपतिर्जिनपतेः स्वयं सात्मजोरघट्टमथ पिप्पलोप पद कूपकं प्रादिशत् ॥३८॥ यावच्छेष शिरस्थ मेक रजतस्थूणा स्थिताभ्युल्ल सत्पातालातुल मंडपा मल तुलामा लंबते भूतलं। तावत्तार रवाभिराम रमणी गंधर्व्व धीर ध्वनिर्द्धामन्यत्र धिनोतु धार्मिक धियः सद्धूप वेला विधौ ॥३९॥ सालंकारा समधि करसा साधु संधान बंधा श्लाघ्यश्लेषा ललित विल-सत्तद्धिता ख्यात नामा। सुवृत्ताढ्या रुचिर विरतिर्द्धु र्यमाधूर्यवर्या सूर्याचार्य्यै र्व्यरचिरमणी वाति रम्या प्रशस्तिः ॥४०॥ सम्बत १०५३ माघ शुक्ल १३ रवि दिने पुष्य नक्षत्रे श्री ऋषभ नाथ देवस्य प्रतिष्ठा कृता महा ध्वज श्चारोपितः ॥ मूलनायकः ॥ नाहक जिन्दज सशम्प पूरभद्रः नागपोचिरथ श्रावक गोष्ठिकैर शेष कर्म्म क्षयार्थं स्व संतान भवाब्धि तरणार्थं च न्यायोपार्जित वित्तेन कारितः ॥वृ॥ परतादि दर्प्प मथनं हेतु नय सहस्र भंगकाकीर्ण्णं। भव्य जन दुरित शमनं जिनेंद्र वर शासनं जयति ॥१॥ आसीद्धी धन संमतः शुभगुणो भास्वत्प्रतापोज्ज्वलो विस्पष्ट प्रतिभः

प्रभाव कलितो भूपोत्तमांगार्च्चितः । योपित्पीन पयोधरांतर सुखाभिष्वङ्ग सल्लालितो यः श्री मान्हरि वर्म्म उत्तम मणिः सद्वंश हारे गुरौ ॥२॥ तस्माद्बभूव भुवि भूरि गुणोपपेतो भूप प्रभूत मुकुटार्च्चित पाद पीठः । श्री राष्ट्रकूट कुल कानन कल्प वृक्षः श्री मान्विदग्ध नृपतिः प्रकट प्रतापः ॥३॥ तस्माद्भूप गुणान्वित तमा कीर्त्तेः परं भाजनं संभूतः सुतनुः सुतोति महिमान् श्री मंमटो विश्रुतः । येनास्मिन्निज राज वंश गगने चंद्रायितं चारुणा तेनेदं पितु शासनं समधिकं कृत्वा पुनः पाल्यते ॥४॥ श्री बलभद्राचार्यं विदग्ध नृप पूजितं समभ्यर्च्य । आचंद्रार्क्कं यावद्दत्तं भवते मया प्रपाल्यते सर्वम् ॥५॥ श्री हस्ति कुंडिकायां चैत्य गृहं जन मनोहरं भक्त्या । श्री मद्बलभद्र गुरोर्योद्धिहितं श्री विदग्धेन ॥६॥ तस्मिल्लोकान्समाहूय नाना देश समागतान । आचंद्रार्क्कं स्थितिं यावच्छासनं दत्त मक्षयं ॥७॥ रूपक एको देयो वहतामिह विंशतेः प्रवहणानां । धर्म्म – – – – क्रय विक्रयेत्र तथा ॥८॥ संभृत गंत्र्या देयस्तथा वहंत्याश्च रूपकः श्रेष्ठः । घाणे घटे च कर्षो देयः सर्वेण परिपाट्या ॥९॥ श्री भट्टलोक दत्ता पत्राणां चोल्लिका त्रयोदशिका । पेल्लक पेल्लक मेतद्द्यूत करैः शासने देयं ॥१०॥ देयं पलाश पाटक मर्यादावर्त्तिक – – – प्रत्यर घट्टं धान्याढकं तु गोधूम यव पूर्णं ॥११॥ पेट्टा च पंच पलिका धर्म्मस्य विशोपक स्तथा भारे । शासन मेतत्पूर्व्वं विदग्धेन राजेन संदत्तं ॥१२॥ कर्प्पासकांस्य कुंकुम पुर मांजिष्ठादि सर्व्व भांडस्य । दश दश पलानि भारे देयानि विक – – – ॥१३॥ आदानादे तस्माद्भाग द्वय मर्हतः कृतं गुरुणा । शेषस्तृतीय भागो विद्या धनमात्मनो विहितः॥१४॥ राज्ञा तत्पुत्र पोत्रैश्च गोष्ठ्या पुरजनेन च । गुरुदेव धनं रक्ष्यं नोपेक्ष्यं हितमीप्सुभिः ॥१५॥ दत्ते दाने फलं दानात्पालिते पालनात्फलं । भक्षितो पेक्षिते पापं गुरु देव धनेधिकं ॥१६॥ गोधूम मृद्ग यव लवण रालकादेस्तु मेयजा तस्य । द्रोणम् प्रति माणकमेक मत्र सर्व्वेण दातव्यं ॥१७॥ वहुभिर्व्वसुधा भुक्ता राजभिः सगरादिभिः । यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥१८॥ राम गिरि नंद कलिते विक्रम काले गते तु शुचिमासे । श्री मद्बलभद्र गुरोर्विदग्ध राजेन दत्त मिदं ॥१९॥ नवसु शतेषु गतेषु तु पण्णवती समधि केषु माघस्य कृष्णैकादश्यामिह समर्थितं मंमट नृपेण ॥२०॥ यावद् भूधर भूमि भानु भरतं भागीरथी

भारती भास्वद्भानि भुजङ्ग राज भवनं भ्राजद् भवांभोदयः। तिष्टन्त्यत्र सुरासुरेंद्र महितं जैनं च सच्छासनं श्री मत्केशव सूरि सन्तति कृते तावत्प्रभूयादिदम् ॥२१॥ इदम् चाक्षय धर्म्म साधनम् शासनम् श्री विदग्ध राजेन दत्तं ॥ सम्वत ९७३ श्री मंमट राजेन समर्थितम् सम्वत् ९९६ ॥ सूत्रधारोद्भव शात योगेश्वरेण उत्कीर्ण्णेयम् प्रशस्तिरिति।

जालोर।

मारवाड़का यह भी बहुत प्राचीन स्थान है। इसका प्राचीन नाम जावालीपूर था।

तोपखाना।

(899)

- - - । - - - - त्रैलक्य लक्ष्मी विपुल कुलगृहं धर्मवृक्षालवालं। श्री मन्नाभेय नाथ क्रम कमल युगं मंगलं व स्तनोतु। मन्ये मंगल्य माला प्रणत भव भृतां सिद्धि सौध प्रवेशे यस्य स्कंध प्रदेशे विलसति गल श्यामला कुंतलाली ॥१॥ श्री चाहुमान कुलांवर मृगांक श्री महाराज अणहिला न्वयोवद्भव श्री महाराज आल्हण सुत - - - - यावली दुर्ललित दलित रिपुवल श्री महाराजकीर्तिपाल हेव हृदयानंदिनंदन महाराज श्री समर सिंह देव कल्याण विजय राज्ये तत पाद पद्मोपजीविनि निज प्रौढि मातिरेक-तिरस्कृत सकल पीलवाहिका मंडल तस्कर व्यतिकरे। राज्यचिंतके जोजल राजपुत्रे इत्येवं काले प्रवर्त्तमाने। रिपुकुलकमलेंदुःपुण्यलावण्यपोत्रं नय विनय निधानं धाम सौंदर्य लक्ष्म्याः। धरणि तरुण नारी लोचनानंदकारी जयति—समर सिंह क्षमा पतिः सिंह वृत्तिः ॥ २ तथा ॥ औत्पत्तिकी प्रमुख बुद्धि चतुष्टयेन निर्णीत भुप भवनोचित कार्य वृत्तिः। यन्नातुलः समभवत् किल जो जलाह्वो - - - - खंडित दुरत विपक्ष लक्षः ॥ ३ श्री चंद्रगच्छ मुख मंडन सुविहित यतितिलक सुगुरु श्री श्री चन्द्रसूरि चरण नलिन युगल दुर्ललित राजहंस श्री पूर्ण्ण भद्र सूरि चरण कमल परि चरण चतुर मधु-करेण समस्त गोष्ठिक समुदाय समन्वितेन श्री श्रीमाल वंश विभूषण श्रेष्ठि यशोदेव सुतेन सदाज्ञाकारि निज-तृयशोराज जगधर विधीयमान निखिल मनोरथेन श्रेष्ठि यशोवीर

परम श्रावकेण संवत् १२३९ वैशाख सुदि ५ गुरौ सकल त्रिलोकी तलाभोग भ्रमेण परिश्रांत कमला विलासिनी विश्राम विलास मंदिरं अयं मंडपो निर्मापितः ॥ तथा हि ॥ नाना देश समागतैर्नवनवैः स्त्री पुंसवर्गै मुहु र्यस्ये -- -- पाव लोकन परैर्नो तृप्तिरासाद्यते । स्मारं स्मारमथो यदीय रचना वैचित्र्य विस्फूर्जितं तैः स्वस्थान गतैरपि प्रतिदिनं सोत्कंठमावर्ण्यते ॥ ४ ॥ विश्वंभरावर वधू तिलकं किमेतल्लीलारविंदमथ किं दुहितुः पयोधेः । दत्तं सुरै रमृत कुंड मिदं किमत्र यस्यावलोकनविधौ विविधा विकल्पाः ॥ ५ ॥ गर्त्तापूरेण पातालं - - - ण महीतलं । तुंगत्वेन नभो येन व्यानशे भुवन त्रयं ॥ ६ ॥ किं च ॥ स्फूर्जद्व्योमसरः समीनमकरं कन्यालिकुंभाकुलं मेषाढय सकुलीरसिंह मिथुनं प्रोद्यद्वृषालंकृतं । ताराकैरवमिंदुधाम सलिलं सद्राजहंसास्पदं यावत्तावदिहादिनाथ भवने नंद्यादसौ मंडपः ॥ ७ ॥ कृतिरियं श्री पूर्ण्ण भद्र सूरीणां ॥ भद्रमस्तु श्री संघाय ॥

(४११)

ओं ॥ संवत् १२२१ श्री जावालिपुरीय कांचनगिरि गढ़स्योपरि प्रभु श्री हेम सूरि प्रबोधित गूर्जर धराधीश्वर परमार्हत चौलक्य ॥ महाराजाधिराज श्री कुमार पाल देव कारिते श्री पार्श्वनाथ सत्कमूल विंब सहित श्री कुवर विहाराभिधाने जैन चैत्ये । सद्विधि प्रवर्त्तनाय बृहद्गच्छीय वादींद्र देवाचार्याणां पक्षे आचंद्रार्कं समर्प्पिते ॥ सं० १२४२ वर्षे एतद्देशाधिप चाहमान कुल तिलक महाराज श्री समर सिंह देवादेशेन भां० पासू पुत्र भां० यशोवीरेण समुद्धृते । श्री सद्राजकुलादेशेन श्री देवा चार्य शिष्यैः श्री पूर्ण्ण देवाचार्यैः । सं० १२५६ वर्षे ज्येष्ठ सु० ११ श्री पार्श्वनाथ देवे तोरणादीनां प्रतिष्ठा कार्ये कृते । मूल शिखरे च कनकमय ध्वजा दंडस्य ध्वजा रोपण प्रतिष्ठायां कृतायां ॥ सं० १२६८ वर्षे दीपोत्सव दिने अभिनव निष्पंन्नप्रेक्षा मध्य मंडपे श्री पूर्णदेव सूरि शिष्यैः श्री रामचंद्राचार्यैः सुवर्ण्णमय कलसारोपण प्रतिष्ठा कृता ॥ सुभं भवतु ॥ छ ॥

(900)

संवत् १२९४ वर्षे श्री मालीय श्रे० वीसल सुत नाग देवस्तत्पुत्रो देल्हा सलक्षण झांपाख्याः झांवा पुत्रो वीजाकस्तेन देवड़ सहितेन पितृक्षां श्रेयोर्थं श्री जावालिपुरीय श्री महावीर जिन चैत्ये करोटि कारिताः ॥ शुभं भवतु ॥

(901)

संवत् १३२० वर्षे माघ सुदि १ सोमे श्री नाणकीय गच्छ प्रतिबद्ध जिनालये महाराज श्री चंदन विहारे श्री क्षीं व रायेश्वर स्थान पतिना भट्टारक रावल लक्ष्मीधरेण देव श्री महावीरस्य आसोज मासे अष्टाहिका पदे द्रम्माणां १०० शतमेकं प्रदत्तं ॥ तद्व्याज मध्यात् मठ पतिना गोष्ठिकैश्च द्रम्म १० दशकं वेचनीयं पूजा विधाने देव श्री महावीरस्य ॥

(902)

ओं संवत् १३२३ वर्षे माग सुदि ५ बुधे महाराज श्री चाचिग देव कल्याण विजय राज्ये तन्मुद्रालंकारिणि महामात्यः श्री जक्षदेवे ॥ श्री नाणकीय गच्छ प्रतिबद्ध महाराज श्री चंदन विहारे विजयिनि श्री मदुनेश्वर सूरौ तैलं गृह गोत्रोद्ध भवेन महं नरपतिना स्वयं कारित जिन युगल पूजा निमित्तं मठ पति गोष्ठिक समक्षं श्री महावीर देव भांडागारे द्रम्माणां शताद्धं प्रदत्तं ॥ तद्व्याजोद्भवेन द्रम्मार्द्धेन नेचकं मासं प्रति करणीयं ॥ शुभं भवतु ॥

(903)

ओं ॥ संवत् १३५३ वर्षे वैशाख वदि ५ सोमे श्री सुवर्ण्ण गिरौ अद्येह महाराज कुल श्री सामंतसिंह कल्याण विजय राज्ये तत्पादपद्मोपजीविनि ॥ राज श्री कान्हडदेव राज्य धुरामुद्वहमाने इहैव वास्तव्य संघपति गुणधर ठकुर आंबड पुत्र ठकुर जस पुत्र सोनी महणसीह भार्या माल्हणि पुत्र सोनी रतनसिंह णाखी माल्हण गजसीह तिहुणा पुत्र सोनी नरपति जयता विजयपाल नरपति भार्या नायकदेवि पुत्र लखमीधर भुवण

पाल सुहडपाल द्वितीय भार्या जाल्हण देवि इत्यादि कुटंब सहितेन भार्या नायक देवि श्रेयोर्थं देव श्री पार्श्वनाथ चैत्ये पंचमी बलि निमित्त निश्रा निक्षेप हट्टमेकं नरपतिना दत्तं तत भाटकेन देव श्री पार्श्वनाथ गोष्ठिकैः प्रति वर्षः आचंद्रार्कं पंचमी वलिः कार्या ॥ शुभं भवतु ॥ छ ॥

महावीरजी का मन्दिर ।

(904)

संवत् १६८१ वर्षे प्रथम चैत्र वाद ५ गुरौ अद्येह श्री राठोड़ वंशे श्री सूरि सिंह पट्ट श्री महाराजे श्री गजसिंह जी विजयि राज्ये······मुहणोत्र गोत्रे वृद्ध उसवाल ज्ञातीय सा० जैसा भार्या जयवंत दे पुत्र सा० जयराज भार्या मनोरथदे पुत्र सा० सादा सुभा सामल सुरताण प्रमुख परिवार पुण्यार्थं श्री स्वर्ण गिरि गढ़ादुर्गौ परिस्थित श्री मत कुमार विहारे श्री मती महावीर चैत्ये सा० जैसा भार्या जयवंतदे पुत्र सा० जयमल जी वृद्ध भार्या सरूपदे पुत्र सा० नइणसी सुन्दरदास आस करण लघुभार्या सोहागदे पुत्र सा० जगमालदि – – पुत्र पौत्रादि श्रेयसे सा० जयमल जी नाम्ना श्री महावीर बिंवं प्रतिष्ठा महोत्सव पूर्वकं कारितं प्रतिष्ठितं च श्री तपा गच्छ पक्षे सुविहिताचारकारक शिथिला-चार वारक साधु क्रियोद्धार कारक श्री ६ आणंद विमल सूरि पट्ट प्रभाकर श्री विजय दान सूरि पट्ट शृङ्गार हार महा म्लेच्छाधिपति पातशाह श्री अकबर प्रतिबोधक सद्वृत्त जगद्गुरू विरुद धारक श्री शत्रुंजयादि तीर्थ जीजीयादि कर मोचक षण्मास अमारि प्रवर्त्तक भट्टारक श्री ६ हीर विजय सूरि पट्ट मुकुटायमान भ० श्री ६ विजय सेन सूरि पट्टे संप्रति विजयमान राज्य सुविहित शिरः शेखरायमाण भट्टा-रक श्री ६ विजय देव सूरीश्वराणामादेशेन महोपाध्याय श्री विद्यासागर गणि शिष्य पण्डित श्री सहज सागर गणि शिष्य पं० जय सागर गणिना श्रेयसे कारकस्य ॥

(905)

संवत् १६८३ आषाढ़ वदि गुरौ श्रवण नक्षत्रे श्री जालोर नगरे स्वर्ण गिरि दुर्गे महाराजाधिराज महाराजा श्री गजसिंह जी विजय राज्ये महुणोत गोत्र दीपक मं० अचला पुत्र मं जेसा भार्या जेवंत दे पु० मं श्री जयल्ला नाम्ना भा० सरूपदे द्वितीय सुहागदे पुत्र नयणसी सुंदरदास आसकरण नरसिंहदास प्रमुख कुटुंब युतेन स्व श्रेयसे श्री धर्मनाथ बिंबं कारितं प्रतिष्ठितं श्री तपा गच्छ नायक भट्टारक श्री हीर विजय सूरि पट्टालंकार भट्टारक श्री विजय सेन - - - ।

(906)

संवत् १६८३ वर्षे अषाढ़ वदि ४ गुरौ सूत्रधार ऊद्धारण तत्पुत्र तोडरा इसर टाहा। दूहा हांसाकेन कारापितं प्रतिष्ठितं तपा गच्छ भ० श्री विजय देव सूरिभिः ॥

(907)

संवत् १६८३ वर्षे अषाढ़ वदि ४ गुरौ। महणोत्र गोत्र। प्र० जमल भार्या सरूपदे समर्पित। श्री सुपार्श्व बिंबं। प्रतिष्ठितं तपागच्छे भ० -- -।

(908)

संवत् १६८३ वर्षे श्री अजित बिंब प्र० त० भ० श्री विजय देव सूरिभिः ॥

(909)

संवत् १६८४ वर्षे माघ सुदि १० सोमे श्री मेड़ता नगर वास्तव्य उकेश ज्ञातीय प्रासेचा गोत्र तिलक सं हर्ष लघु भार्या मनरंगदे सुत संघपति सामीदासकेन श्री कुंथुनाथ बिंबं कारितं प्रतिष्ठितं श्री तपा गच्छे श्री तपा गच्छाधिराज भट्टारक श्री विजय देव सूरिभिः ॥ आचार्य श्री विजयसिंह सूरि प्रमुख परिवार परिकरितैः ॥ श्रीरस्तुः ॥

(910)

संवत् १६८३ वर्षे आ० व० गुरौ श्र० लठांक श्री माण विप्र आ० विजयदेव सूरिभिः।

(911)

चौमुखजी का मन्दिर।

संवत् १६८१ वर्षे प्रथमा चैत्र वदि ५ गुरौ श्री श्री मुहणोत्र। गोत्र सा० जेसा भार्या जसमादे पुत्र सा० जयमाल भार्या सोहागदेवी श्री आदिनाथ विवं कारित प्रतिष्ठा महोत्सव पूर्वकं प्रतिष्ठितं च श्री तपा गच्छे श्री ६ विजय देव सूरीणा मादेशेन जय सागर गणिना।

हरजी

यह मारवाड़के जालोर के पास गांव है।

(912)

संवत् १२३१ मार्गा सुदि ८ भ० शांति शिष्येण नेमिचंद्रेण आरम श्रेयार्थं प्रदत्तः॥

(913)

संवत् १५१७ वर्षे ज्येष्ठ सुदि ३-वा० श्री मुनिशेषर शिष्य दया रत्न श्री वीरस्य त्कया केकृत॥

(914)

संवत् १५४७ वर्षे फागुण सुदि ११ दिने रा० श्री विलास म० सोम रात्रे श्राः --

(915)

श्री शीले सार्थो मतिर्यस्यातः स्पृहा वीर देशिते । महिमा कीर्त्ति लेखा स्था । तस्य देवेषु दुर्ल्लभा ॥

(916)

-- श्री पज्जु वधू असोचय -- वहुया भज्जा सुहंकर वणिस्स । सो भन सरावि-याए धम्मत्थम कारि लग एसा ॥ १ ॥

(917)

---- चंदण वाल नासा --- षा मति सिरी सा -- षी -- लगा कारिता

जूना ।

यह मारवाड़का वाडमेर इलाके में गांव है ।

(918)

ओं ॥ संवत् १३५२ वैशाख सुदि ४ श्री बाहड मेरौ महाराज कुल श्री सामंत सिंह देव कल्याण विजय राज्ये तन्नियुक्त श्री २ करणे मं० चोरासेल वेलाउल भां० मिगल प्रभृतयो धर्माक्षराणि प्रयच्छन्ति यथा। श्री आदिनाथ मध्ये संतिष्ठमान श्री विघ्न मर्दन क्षेत्रपाल श्री चउंडराज देवयोः उभय मार्गीय समायात सार्थ उष्ट्र १० वृष २० उभयादीप ऊर्द्धं सार्थं प्रति द्वयोर्द्वयोः पाइला । पक्षे भीम प्रिय दर्शाविंशापक्क अर्द्धार्द्धेन ग्रहीतव्याः । ओसो लागो महाजनेन मानितः ॥ यथोक्तं बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः । यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं ॥ १ ॥ छ ॥

जूना बेडा (मारवाड)

(919)

ॐ ॥ संवत् ११४४ माघ सु० ११ भ्रं पतेरं प्रदेव्यास्तु सूनुना जेज्जकेन स्वयं प्रपूर्ण वज्र मानाद्यै र्मिलित्वा सर्व बांधवैः ॥ १ ॥ खन्नके पूर्ण भद्रस्य वीरनाथस्य मंदिरे कारिता वीर नाथस्य श्रेयसे प्रतिमानघा ॥ २ ॥ सूरे प्रद्योतनार्यस्य ऐन्द्र देवेन सूरिणा भूषिते सांप्रतं गच्छे निःशेष नय संजुते ॥ ३ ॥

(920)

संवत् १६४४ वर्षे फागुण दि १३ उकेस ज्ञातीय वापणे गोत्रे संघवी टीलु भार्या दीड़म दे पुत्र सं० गोपा भार्या गेलमदे पुत्र रूपा चंदा श्री रादुलिया भार्या मन भगोदे पुत्र भोजा भा० ना - - - - श्री पार्श्वनाथ विंव कारित तपा गच्छ भट्टारक श्री श्री हीर विज - - -- ।

(921)

संवत् १३४७ वर्षे वैशाख सुदि १५ रवौ श्री ऊकेश गोत्रे श्री सिद्धा चार्य संताने श्रे० वेल्हू भा० देमलतत्पुत्र श्रे० जन सीहेन सकुटुम्बेन आत्म श्रेयसे पार्श्वनाथ विंवं कारितं प्र० श्री देव गुप्त सूरिभिः ॥

(922)

संवत् १५०७ वर्षे माहि सुदि ५ रवौ प्र० ग० दोला राजू पु० वीसा भा० विमलादे पु० डुंगर सहितेन स्व पुण्यार्थे श्री विमलनाथ विंवे का० प्र० श्री मडाहड़ां गच्छे श्री नय कीर्त्ति सूरि भि० माल्हेणसू ग्रामे वास्तव ।

(923)

सं० १६३० वरषि वैशाख वदि ८ दिने श्री वहड़ा ग्रामे उसवाल सुते गोत्र खोलाकी साघणे सागासाहा भी दाभा० खेमलदे पुत्र राजा भार्या सेवादे पुत्र माना कमरसी श्री कुंथुनाथ विंवं श्री हीर

(924)

सं० १५३० वर्षे सा० व० ६ प्राग्वाट ज्ञाति व्य० चाहड भार्या राणी पु० व्य० वेला प्रमुख कुटुम्ब युतेन स्व श्रेयसे श्री संभवनाथ विंवं का० प्र० तपा श्री लक्ष्मी सागर सूरिभिः चुंपरा ग्रामे

(925)

सं० १६३० वर्षे वैशाख वदि ८ दिने श्री वहड़ा ग्राम उसवाल ज्ञातीय गोत्र तिलहरा सा० सूदा भार्या सीहलादे पुत्र नासण वीदा नासण भार्या न काग देवीदा भार्या कनकादे सुत वला श्री आदिनाथ विंवं कारापित श्री हीर विजय सूरिभिः प्रतिष्ठितः ॥

(926)

सं० १५१५ वर्षे माघ शु० १५ उकेश लोढ़ा गोत्र सा० झांझू भा० कपूरी सुत सा० धीरपालेन मा० गांगी पुत्र पनवेल कर्मसी भ्रातृ दिल्हादि युतेन श्री संभवनाथ विंवं कारित प्रतिष्ठितं तपा श्री रत्न शेखर सूरिभिः ॥

(927)

सं० १६२३ वर्षे वैशाख मासे शुक्रवारे १० तिथौ इडर नगर वास्तव्य उसवाल ज्ञातीय। सं० श्री। लहुआ सुत सं० जसा सं श्री रामा महा श्राधेन भार्या रला। दम० कडूआ

म० सिंघराज प्रमुख सकल कुटुंब युतेन श्री शांतिनाथ विंबं कारितं। श्री श्रीतपागच्छ युगप्रधान विजय दान सूरि पट्टे श्री हीर विजय सूरिभि प्रतिष्ठितं। वैशाख सुदि दशमी दिन॥

(928)

संवत् १६३४ वर्षे माघ सु० ९ उप० ज्ञाती गादहीया गोत्रे सा० कोहा भा० रतनादे पु० आका भा० यस्मीदे पु० हराजावड़ मेरादि साहि सिथी सति मतं श्री वास पूज्य विंबं कारि० श्री वपु श्री कुकुदाचार्य संताने प्र० देव गुप्त सूरिभिः॥ श्री॥

(929)

सं० १४२२ श्री सर प्रभु सूरि उपदेशेन प्रतिष्ठितं।

(930)

संवत् १६४४ वर्षे फागुण वदि १५ उपकेश ज्ञातीय वाहड़ा गोत्रे - - - - - संभवनाथ - - - - लघ गछ लघ श्री श्री हीर विजर सूरि।

नगर गांव (मारवाड)

(931)

संवत् १५१६ वर्षे पौसष वदि ११ दिने गुरुवारे श्री राड्डउड राज्यें श्री सोभ्र बंम पुत्र श्री श्री वयं रसल्ल नरेस्वरेण बांधव सामंत सल्हा पुत्र हरुव मुख सपरिवारेण तेज बाई भरतारं भाटी महिप पुण्यार्थं गोविंदराजेन श्री श्री महावीर चैत्ये वा० मोदराज गणि उपदेशेन पटहो बांधव मं० धारा पुत्र थाथल मंडाही पुत्र नाल्हा मं० जाणा मं० दे० ऊट प्रमुख श्री संघ समु मक्षं पटहो वाद्यमानो चिरं जयातः शुभं भवतु नारदेन लषतं॥

सांचोर (मारवाड)

(932)

स्वस्ति श्री संवत् १२२५ वर्षे वैशाख वदि १३ दिने श्री सत्य पुर महा स्थाने राज श्री भीमदेव कल्याण विजय राज्ये उपकेश ज्ञातीय भंडारी भंजग सिंह पुत्र भंडारी पाल्हा सुत छोघाकेन वृद्ध भ्रातृ भ० साम वधू घासकितेन श्री महावीर चैत्ये आत्म श्रेयसे चतुष्किका उद्धारः कारतः ॥

रत्नपुर ।

मारवाड़के जसवंत पुरा इलाके में यह स्थान भी बहुत प्राचीन है ।

(933)

ॐ संवत् १२३८ पोष वदि १० वला० नागू पुत्र श्रे० उद्धरण भार्यया श्रे० देवणाग पुत्रि-कया उत्तम परम श्राविकया स्व श्रेयोर्थं श्री पार्श्वनाथ देव चैत्य मंडपे स्तंभोयं कारितः ॥

(934)

ॐ ॥ संवत् १२३८ पोष वदि १० श्रे० आंब कुमार पुत्र श्रे० धवल भार्यया वला० नागू पुत्रिकया संतोख परम श्राविकया स्व श्रेयोर्थं श्री पार्श्वनाथ देव चैत्य मंडपे स्तंभोयं कारितः ॥

(935)

ॐ ॥ संवत १३३३ वर्षे माघ सुदि १ प्रतिपदायां महामण्डलेश्वर राज श्री चाचिग देव कल्याण विजय राज्ये तन्नियुक्त महामात्य श्री जारवा प्रभृति पंच कुल प्रतिपत्तौ रत्न पुरे देव श्री पार्श्वनाथाय पौष कल्याणिक यात्रा निमित्तं मह माधव

सुत महं मदन सुत महं धीणा । श्री कुमरसिंह सुत महं ऊदल प्रभृति पंच कुलेन श्री पार्श्वनाथः देव प्रतिवद्ध श्री चैत्र गच्छीय श्रीदेवचंद्र सूरि संताने श्री अमरचंद्र सूरि शिष्य श्री अजित देव सूरीणा मुपदेशेन हट्ट द्वय भूमिः प्रदत्ता आ चंद्रार्कं नंदतु॥ वहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः। यस्य यस्य यदा भूमि स्तस्य तस्य तदा फलं।

(936)

संवत् १३४८ वर्षे चैत्र सुदि १५ गुरावद्येह रत्न पुरे महाराज कुल श्री सांवत सिंह। कल्याण विजइ राज्ये तन्नियुक्त महं॰ कटुआ प्रभृति पंच कुल प्रतिपत्तौ श्री पार्श्वनाथ प्रतिवद्ध महा महणा श्रे॰ सांता मह॰ विजय पाल गो॰ लषण प्रभृति समस्त गोष्ठिकानां विदितं अक्षयराणि प्रयच्छंति यथा रत्नपुर वास्तव्य गूर्जर न्यातीय श्रे॰ राजा सुत वादा गांगा सुत मंडलिक मदन प्रवृति कानां देव श्री पार्श्वनाथ प्रति वद्ध तोडक प्रवेश द्वार दक्षिण हस्त प्रथम हट्टात् द्वितीय हट्ट श्रे॰ गांगा श्रेयोर्थं वादा सत्क देव कुलिका विंव पूजापनार्थं श्री पार्श्वनाथ देवेन गोष्ठिकैः। विदित्तं हट्ट समर्पितं। अस्य हट्ट निक्रइ प्रतिदेव श्री पार्श्वनाथस्य श्री वाचकेन वीसल प्रीयमाय एक त्रिंशत्याधिक शत मेकं प्रदत्तं। हट्ट मिदं चतुर्भि गोष्ठिकैः संमिलतै भूत्वा भाहक संस्था करणीया स्वात्मीय परिणा श्रेष्ठि वादा भुतक सांध विनैः भाहके हट्ट कस्यापि नार्पणीयं। तथा सत्क उतपत्ति व्यय कर्ण वाणगोष्ठिकानु विना एकाकिनैः न कर्त्तव्या। उतपत्ति मध्यातु देव कुलिकाया विंवानां नेचकप देवी॰ द्र २। ३ वर्षे प्रतिदातव्या उतपत्ति मध्यात् हट्टे पतित दुसित पदे कमठाय कारापनीया। यच्च भाहक स्वक द्रव्यं वर्द्धंति तत् पोष कल्याणक दिने देव कुलिकाया विंव भोग करणीय। उरितं द्रव्यं श्री पार्श्वनाथ सत्क नालि.कायां यत्रं। न्यां खेपनीयं निक्षेप उधार गोष्ठिकै करणीय। अत्र मतानि महा महणा मतं श्रेष्टि सांता मतं धराणे गामी वा हस्तेन महं विजय पाल मतं। गोष्ठिक लषणा मतं॥ स

बिलाड़ा (मारवाड)

(937)

सं० १८०३ वर्षे शाके १६६८ प्रवर्त्तमाने मगशिर सुदि २ दिने सोम वारे महाराज राज राजेश्वर महाराजा जी श्री अभयसिंह जी कुंवर श्री रामसिंह जो विजय राज्ये बृहत खरतर श्री आचार्य गच्छे। भट्टारक श्री जिन कीर्त्ति सूरि जी वर्त्तमाने सति। श्री बिलाड़ा नगरे कटारीया कलावत साह श्री तुंता जी पुत्र गिरधरदासजीकेन जिनालय करापितः स्थानको द्यमः उपाध्यायजी श्री करम चंद हरष चन्दाभ्यां कृतः कलावत श्रावकाणामपि विशेषोपदेशो दत्तस्ते नाग्रं श्री सुमतिनाथ जी देव लो जातः – – – – द्रुधर भीषन कमाभ्यां कृतः उपाध्याय श्री करमचंद गणि पं० हरषचंद गणि पं० प्रतापसी गणि प्रमुख सपरिकरेन विब–श्री भंवतु।

बोईया (मारवाड)

(938)

संवत् १२५० आषाढ़ वदि १४ रवा भुडपद्र वास्तव्य श्रावक साभण भार्या जिसवई सुत रोहड़ राम्रदेव भावदेव कुटुंब सहितेन राम्बदेवेन स्तंभ लता प्रदत्ता द्रा० २०।

(939)

ओं० संवत् १२५० आसाढ़ वदि १४ रवौ बहुविध वास्तव्य र० रोहिल सुत धांधल तत्सुत गुण घर साल्हणाभ्यां मातृ थिरम्मति श्रेयार्थे स्तम्भ लता – – – – द्रां० २० प्रदत्ता।

कोटार (गोड़वाड़)

(940)

संवत् १३३५ वर्षे श्रावण वदि १ सोमेऽद्येह समाण ... सउ [... या प्रा० इनउ ... पयरा महं सज्जन ठ० मह भा .. ठ घणसीह ठ देवसीह प्रभृति पञ्च कुलेन श्रीधात भिधान श्रीमहावीर देवस्य ने च के - - - वर्ष स्थितके कृत द्र २४ चतुर्विंशति द्रम्माः वर्षं वर्षं प्रति - मी मंडपिका पंच कुलेन दातव्याः ॥ पालनीया इच ॥ बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः यस्य यस्य यदा भूमी तस्य तस्य तदा फलं ॥ शुभं भवतु।

(941)

सं० १३३६ वर्षे श्रेष्ठि को सीहन चयपने दत्तद्र १२३ - यद्र ३६ स - प - १ मुंडा - या स्वस्ति यमाण पञ्च कुलेन वर्षं वर्षं प्रति - - - - या दातव्याः ॥

किराडू।

मारवाड़ के मालानी परगने में यह स्थान प्राचीन है। हिन्दुओं के समय में इस स्थान का नाम किराट कूप था और जैनियों के प्रसिद्ध नृपति कुमार पाल ने इस स्थान में जैन धर्ममें दीक्षित होने के पूर्व कईएक बहुत सुन्दर शिव मन्दिर बनवाया था। काल के चक्र से इस समय उन देवालयों की बहुत बुरी हालत है और सब लेख भी नष्ट हो गये हैं।

(942)

ॐ नमः सर्व्वज्ञाय ॥ नमोऽनंताय सूक्ष्माय ज्ञान गम्याय वेधसे । विश्वरूपाय शुद्धाय देव देवाय शंभवे ॥१॥ देवस्य तस्य चरितानि जयंति शंभोः स (श्व) श्वत् कपाल

विधु (भस्म) विभूषणस्य । गर्व्वः स कोपि हृदि यस्य पदं करोति गौरी जितं च चिर-वल्कल वर्ष दर्शात् ॥२॥ वशिष्ठ - - - - - - - भूषिते र्व्वुद भूधरे। सुरभ्याः परमाराणां वंशो - - - नलं कुंडतः ॥३॥ तत्रानेक मही पाल - - - - - - सिंधु धिराजो महाराज - - - रणे समभून्मरु मंडले ॥४॥ निरर्गल मिलद्वैरि - - - - - प्रतापो ज्वल दूसङः ॥५॥ शंभुवद्द भूरि भूमीशाभ्यर्च्चनीयो भ - - - - सूः ॥६॥ खड्ग रणत्कार रावणो ल्वण वैरिहं भवः ॥ - - - - ॥७॥ सिंधु राज धरा धार धरणी धर धाम वान ॥ मा - - ॥८॥ जो भवत्त स्मात् सुर राजो हराज्ञया देव राजेश्वर- - - - ॥९॥ - - - मपहाय मही मिमां। मन्ये कल्प द्रुमः प्रायाद दृश्यक - - - ॥१०॥ - — दारणात्। श्री मद्दुर्ल्लभ राजोपि राजेंद्रो रंजितो — - - ॥११॥ - - - धंधुक - तः। येन दुर्व्वार वीर्येण भूषितं मरु मंडलं ॥ १२ ॥ धर्म्म करो वभू - - - - - कृष्ण राजो महा शव्द त्रिभूषितः ॥ १३ ॥ तत्पुत्रः सोच्छ्द राजाख्यः च्य - - - स्व - - - - कल्पद्रुमो भवत् ॥ १४ ॥ तस्मा दुदय राजाख्यो महाराज - - - मंडलीक पदाधिकः ॥ १५ ॥ प्राचोड़ गौड़ कर्णाट मालवोत्तर पश्चिमं । - - कृ - शजं ॥ १६ ॥ प्राश्च सिंधु राज भूपालात्पितृ पुत्र क्रमात्पुनः । तस्मादुदय राजश्च पुत्रः सोमेश्वरः सुतः ॥ १७ ॥ उत्कीर्ण मपि यो राज्य मुद्दध्रे भुज वीर्यतः । जयसिंह महिपालात् - - - यद्व - ॥ १८ ॥ - - अतश्च नव गत वर्षे ११९६ १२०० विक्रम भूपतेः प्रसादा ज्जयसिंहस्य सिद्धराजस्य भू भुजः ॥ १९ ॥ श्री सोमेश्वर राजेन सिंधु राजपुरोद्भवं । भूपो निर्व्याज शौर्येण राज्य मेतत्समुद्धृतं ॥ २० ॥ पुनर्द्वादश संख्येषु पंचाधिक शते १२०५ ष्वलं । कुमार पाल भूपालात् सप्रतिष्ठ मिदं कृतं ॥ २१ ॥ किराट कूप मात्मीयं शिव कूप समन्वितं । निजेन क्षत्र धर्म्मेण पालयामास यश्चिरं॥२२॥ अष्टा दशाधिके चास्मिन शत द्वादशकेऽश्विने । प्रतिपद्गुरु संयोगे सार्धयामे गते दिनात् ॥ २३ ॥ दंडं सप्तदश शता न्यश्वानां नृप जज्जकात्। सह पंच नखांश्चैतमृय-रादिभिरष्टभिः ॥ २४ ॥ तणु कोद नवसरो दुर्गौ सोमेश्वरो ग्रहीत् । उच्चांगवरहा साद्धयां चक्रे चैवात्म सादसौ ॥ २५ ॥ वहुशः सेवकी कृत्य चौलुक्य जगती पतेः । पुनः

संस्थापयामास तेषु देशेषु जज्जकं ॥ २६ ॥ प्रशस्ति मकरो देतां नरसिंहो नृपाज्ञया । लेखको घ्रय (णे] देवः सूत्र धारोस्तु जशोधरः ॥ २७ ॥ विक्रमे संवत् १२१८ अश्विन सुदि १ गुरौ ॥ मंगलं महा श्रीः ॥

सूंधा पहाड़ी।

मारवाड़के जसवंतपुरा के पास उत्तरकी तर्फ पहाड़ीके ढलावमें सूंधा माता नामक चामुंडाके मदिरमें लगे हुए दो पत्थरों पर यह लेख खुदे हुए हैं।

(913)

ओं ॥ श्वेतांभोजातपत्रं किमु गिरि दुहितुः स्वस्तटिन्या गवाक्षः किंवा सौख्यासनं वा महिम मुख महाबिन्दु देवी गणस्य । त्रैलोक्यानंदहेतोः किमृदिसमनवं श्लाघ्य नक्षत्र मुच्चैः शंभोर्भालस्थलेंदुः सुकृति कृतनुतिः पातु वो राज लक्ष्मीं ॥ १ ॥ ईशस्यां-कार्वानिरनुपमानंद संदोह मूला चंचद्वासोंचल दलमयी भूषण प्रौढ पुष्पा । सल्ला-वण्योदय सुफलिनी पार्व्वती प्रेम वल्ली लक्ष्मीं पुष्णात्वनु दिन मति व्यक्त भक्तया नतानां ॥ २ ॥ विकट मुकुट साद्यत्तेजसा व्योम्नि दैत्यानिव भुवि मणिमय्या मेखलायाः क्कणेन । अनणुरणित लीला हंसकैस्त्रासयंती फणि पति भुवनांतश्चंडिका वः श्रियेस्तु ॥ ३ ॥ श्री मद्वत्समहर्षि हर्ष नयनो द्भूतांबु पूर प्रभा पूर्व्वोर्व्वीधर मौलि मुख्य शिख-रालंकार तिग्मद्युतिः । पृथ्वीं त्रातु मपास्त दैत्य तिमिरः श्री चाहमानः पुरा वीरः क्षीर समुद्र सोदर यशो राशि प्रकाशो भवत् ॥ ४ ॥ तत्ना वल्यामिव नृपततौ तत्क्रमे विश्रु-तायां धर्म्मस्थान प्रकर करण प्राप्त पुण्योत्सवायां । श्री नडूलाधि पतिर भव ल्लक्ष्मणो नाम राजा लक्ष्मीलीला सदन सदृशाकार शाकंभरींद्रः ॥ ५ ॥ आपाताला त्समर जलधिं मद्रो यस्य खड्गो मुष्टिव्याजाद्भुजग पतिना शृंखले नावबद्धः । निर्म्मथ्योच्चैः सपदि कमलां लीलयोद्भृत्य सत्तरचक्रे नूत्नं रणित कटकः केलि कंपच्छलेन

॥ ६ ॥ तस्मादि्द मादि्र भवनाथ यशो पहारी श्रीशोभितो जनि नृपो स्य तनूद्भवोथ । गांभीर्यधैर्य सदनं बलि राज देवो यो मुञ्जराज बल भंगमचीकरत्तं ॥७॥ साम्राज्याशा क रेणुं रिपु नृपति गज स्तोम माक्रम्य जह्रे यत्खङ्गो गंध हस्ती समर रस भरे विंध्य शैलाय माने । मुक्ता शुक्तींदु कांतोज्ज्वल रुचिषु लसत्कीर्त्ति रेवातटेषु प्रौढ़ानं दोपचारो स्वण पुलकततिः पुष्कराणां छलेन ॥ ८ ॥ तस्पितृव्य जसयाथ बांधवः श्री महींदुर जनिष्ट भूपतिः । यत्कृपाण लतिकामुपेयुषां छायया विरहितं मुखं द्विषां ॥९ ॥ जज्ञे कांतस्तदनु स भुवस्तत्तनुजो श्वपालः कालः क्रूरे द्विषि सुचरिते पूर्ण चंद्रायमानः। यः संलग्नो न खलु तमसा नैव दोषाकरात्मा तेजो भक्तः क्वचिदपि न यः किंच मित्रोदयेषु ॥१०॥ केयूराग्र निविष्ट रत्न निकर प्रोद्यत्प्रभाडंबरं व्यक्तं संगर रंग मंडपतले यं वैरिलक्ष्मीः श्रिता । वीरेषु प्रसृतेषु तेषु रजसा नीतेषु दुर्ल्लक्ष्यतां लब्धो पायबलापि निर्म्मल गुणैर्वश्या प्रशस्या कृतिः ॥ ११ ॥ पुत्रस्तस्याहिल इति नृपस्तन्मयूख च्छलेन स्रष्टा यस्य व्यधित यशसां तेजसां तोलनां नु । गंगा तोले शशि तपनयो र्दंभतश्चारु चेले मध्यस्थायि भ्रु वमिष लसत् कंटके कौतुकेन ॥ १२ ॥ गुर्जराधिपति भीम भूभुजः सैन्य पूर मजयद्रणेषु यः । शंभुवत् त्रिपुर संभवं बलं वाडवानल इवांबुधे र्जलं ॥ १३ ॥ सैन्या क्रांता खिल वसुमती मंडलस्तत्पितृव्यः श्रीमान् राजा भवदथ जिताराति मल्लो णहिल्लः । भीम क्षोणी पति गज घटा येन भग्ना रणाग्रे हृत्वार्थां भोनिधि रघु कृते वहे पंक्तिः खलानां ॥ १४ ॥ अंभोजानि मुखान्यहो मृग दृशां चंद्रो दयानां मुदो लक्ष्मीर्यत्र नरोत्तमानुसरण व्यापार पारंगमा । पानानि प्रसभं शुभानि शिखरि श्रेणीव गुप्यद्गुरुस्तोमो यस्य नरेश्वरस्य तुलनां सेनांबु राशेर्दधौ ॥ १५ ॥ उर्व्वीरुड् विटपावलंब सुगृही हर्म्येषु दत्वा दृशं ध्यातास्यंत मनोहराकृति निज प्रासाद वातायनः । भूस्फोटानि वनांतरेषु वितत्तान्या लोक्य हाहेति वाक् सस्मारा तपवारणानि शतशो यद्वैरि राज व्रज -- ॥ १६ ॥ दृष्टः कै र्न चतुर्भुजः स समरे शाकंभरीं यो बलाज्जग्राहानुजघान मालव पतेर्भोजस्य साढाह्वयं । दंडाधीशम पार सैन्य विभवं तीव्रं तुरुष्कं च यः साक्षाद्विष्णुर साधनीय यशसा शृंगारिता येन भूः ॥ १७ ॥ जज्ञे भूभृत्तदनु तनयस्तस्य बाल प्रसादो भीमक्ष्मा-

